इति । अनियतहेतुकत्वं पुनरनयैव युक्त्या दूरीकृतत्वाद् दूरीकर्तुं न सन्देहगोचरतामप्यर्हति । अपि च - स्वाभाविकत्वे दहनौष्ण्यादीनामिव यावद्द्रव्यभावित्वमपि सर्वेषां धर्माणामापद्यते । आपद्यतामिति चेत्, हन्त तर्हि जगत्यस्मिन्नेव कदाचित् सुखित्वं कदाचिद् दुःखित्वं चैकस्यैव कदाचित् सुखोपायत्वं कदाचित् दुःखोपायत्वं चेत्येवंविधविरुद्धधर्मजातं निर्मर्यादमेव प्रत्याययत् प्रत्यक्षलक्षणं प्रमाणमप्यप्रमाणम् । अखिलान्यपि प्रतिकूलानि अनुमानादिमानान्तराणि निरन्तराणि । यद्वक्ति....कुत्र खलु विधत्तां साम्प्रतमभिधत्तां भवान् । अतः स्वाभाविकविलक्षणत्वं येषां भावानां तेषां हेत्वपेक्षत्वेनावश्यं भवितव्यम् । मधुमधुरिमकण्टकतैक्ष्ण्याद्यपि सुखदुःखहेतुभूतप्राणिगतधर्माधर्मोपलक्षितसामाग्र्यैवानर्गलमाहितसंभवोपलम्भमिति तत्रापि हेत्वपेक्षत्वमप्रतिपक्षमेव प्रथत इति सिद्धम् । एवं सर्वाङ्गीणेऽपि निरूपणे चार्वाकमतमिदमकृशकृशानुशिखावलीढमिव जातुषविभूषणमाशुतरमेव विशीर्यतेतरां इत्यन्यदेव दर्शनं पुरुषार्थसाधनत्वेनाश्रयणीयं परमार्थदिदृक्षुभिर्मुमुक्षुभिरित्यनन्तरमार्हतं मतं परामृष्टम् । तच्चैवमाचक्षते —



## III

वयन्तु ब्रूमहे नग्नाः । अस्माकं तु परलोकक्षय आत्मा विद्यते । परलोकार्थमनुष्ठानं च विद्यते एव केशोल्लुञ्छनादि । उक्तं च उदरबृंहणात् स्वर्गो भवति । मलधारणात् स्वर्गो भवति । तप्तशिलारोहणात् स्वर्गो भवति । क्षितिधराक्रमणात् स्वर्गो भवति इति । अस्मिन् मते प्रमाणानि त्रीणि सन्ति । प्रत्यक्षमनुमानमागमश्चेति । तत्रैषामेवागमवार्ता । अनैकान्तिकज्ञानं मोक्षसाधनम् ।

तथाहि—स्वदेशकालकारणाधारतया घटादेः सत्वं, अन्यदेशादिष्वसत्वमिति स्वानुभवसिद्धमेतत् । तथा घटादेर्मृद्रूपतया नित्यत्वम् कपालप्रतिकपालचूर्णादिरूपेणानित्यत्वमिति । एकस्यामवस्थायामवस्थान्तरस्योपलम्भादनैकान्तिकं विश्वमिति प्रत्यक्षमेवात्र प्रमाणम् । अनुमानमपि । भावना च नैकान्तिकत्वमावेदयद्भिर्दृश्यते । विमतिपदमनैकान्तिकम् । प्रमेयत्वात् । यद्यत्प्रमेयम् तत्तदनैकान्तिकं दृष्टम् । यथा हेरम्बनरसिंहादि । इति । एवं प्रत्यक्षानुमानाभ्यामनैकान्तिकत्वेऽवगते परिग्रहद्वेषयोरभावाद् रागद्वेषादय आस्रवा विनश्यन्ति । यथाह—

नाकस्मिका न नित्यास्ते न चाशक्यप्रतिक्रियाः ।
नाज्ञातशमनोपायाः क्षीयेरन्नास्रवाः कचित् ॥ 11 ॥

इति । एवं रागद्वेषादिविनाशे संसारकारणभूतप्रवृत्त्यभावः । तदभावे पुण्यापुण्यपुद्गलाभावः ततः शरीरान्तरपरिग्रहाभाव, इति विदेहकैवल्यं भवति । तस्यां दशायामात्मा सर्वज्ञो भवति । देहपरिमितश्चात्मा । यदा त्वयं शरीरी, तदा तस्यापरक्तत्वात् चक्षुरादीन्द्रियच्छिद्रेषु चैतन्यनिस्सरणात् परिमितमेवासौ जानाति । आत्मा स्वयं चिद्रूपः किञ्चिदवश्यं पश्यतीति तस्य शैली । सच्छिद्रकुम्भप्रविष्टप्रदीपप्रभावत् किञ्चिदेव प्रकाशयति । चिति शक्तिः सर्वप्रकाशिका भवति । अतश्चापवर्गदशायामात्मा सर्वज्ञो भवतीति । अन्यन्मतमनैकान्तिकपरिज्ञानाद् विशिष्टप्रदेशेक्षयशरीरादिप्राप्तिरपवर्ग इति । उक्तं चास्माकं मते—

कुरुध्वमसद्वाक्यानि यदि मुक्तिमभीच्छथ ।
अर्हध्वमेतद्धर्म्यं च मुक्तिद्वारमसंवृतम् ॥ 12 ॥

धर्मायैतदधर्माय सदेतन्न सदित्यपि ।
विमुक्तये त्विदं नैतद्विमुक्तिं संप्रयच्छति ॥ 13 ॥

परमार्थोऽयमत्यर्थं परमार्थो न चाव्ययः ।
कार्यमेतदकार्यं च नैतदेव स्फुटं न्विदम् ॥ 14 ॥

इत्यादि भावना निश्रेयसजननीति तदेतदाशाम्बरैरभिहितम् । इन्द्रजालादपि महेन्द्रजालम् । तत्र तावन्नित्यमनित्यम् अस्तिनास्तीत्यादिगतिः कथमिव सङ्गतिमती । नित्यानित्यादिधर्माणां परस्परपरिहारेणैकत्र स्थितिविरोधात् । तथाहि - भेदाभेदावेकत्र न सम्भवतः विधिप्रतिषेधरूपत्वात् । यदेवंविधं तदेवंविधम् । यथा कुम्भतत्प्रध्वंसादि तथा भेदाभेदावपि । तस्माद्यथोक्तमिति । अथ कुम्भतत्प्रध्वंसादेरपि मृदादावेकत्रैव सम्भवोऽभ्युपगम्यते, कारणे कार्यस्य सद्भावेऽभ्युपगम्यमाने प्रेक्षापूर्वकारिप्रवृत्तिर्नपुंसकसुरतवन्न कञ्चन स्वार्थं पुष्णाति । अथ कारणात्मना सत्वेऽपि स्वरूपेणासत्वाद् एवं प्रवृत्तिसाफल्यमिति चेत्, तर्हि स्वरूपेण सत्वमत्यन्तमसदेवेति सिद्धान्तभङ्गप्रसङ्गः । अथ स्वरूपस्यापि रूपान्तरेण कारणात्मना सत्वमिति चेत्, पुनरपि प्रवृत्तिवैफल्यप्रसङ्गः । तस्मादनैकान्तिकत्वं विचार्यमाणमपि लीयमानाज्यवद्विशीर्यते । यदिदमन्वमायि, प्रमेयत्वादनैकान्तिकं विश्वं, हेरम्बनरसिंहादिवदिति, तदपि न शोभामुद्वहति । अनुष्णः कृष्णवर्त्मेत्यनुमानवत् प्रत्यक्षविरुद्धकालात्ययापदिष्टत्वात् । तथा च यावतां भावानां प्रत्यक्षोपलम्भसम्भवस्तावतामितरेतरविलक्षणरूपपरिस्फुरणादस्ति प्रत्यक्षविरोधः । तथा प्रमेयत्वादिति हेतुत्वेन व्यभिचरतीति साध्यम् । न खलु तस्य प्रमेयत्वेऽप्यनैकान्तिकत्वमिष्यते । यतः - ननु तस्यापि पक्षनिक्षिप्तत्वात् न पक्षेण व्यभिचारचोद्यं युक्तम् । हन्त तर्हि पक्षैकदेशो हेतुरिति पूर्वस्माद् भीषणं दूषणं प्रसरीसर्ति । ततो नैकान्तिकं जगदित्यस्य मिथ्याज्ञानत्वान्न निश्रेयसहेतुत्वमित्यापतितम् । तद्धेतुत्वाभ्युपगमे चातिप्रसङ्गचोदना मनो दुनोति । तथा परलोकोऽपि तेषां पक्षे दुरुपपादः । आत्मनः कायपरिमाणत्वे हस्तिपुत्तिकादिशरीरेषु विकाससङ्कोचधर्मकत्वादनित्यत्वादात्मनः कथं परलोकसंभवः । तथा नैकान्तिकं जगदित्यभ्युपगमे सर्वस्य सर्वात्मकत्वेन शुचितदितरविभागादेरभावात् सकलक्रियाविप्रलोपप्रसङ्गः इति । यच्चेदमभ्यधुः चिद्रूपत्वादात्मनः शरीराद्यावरणाभावान्मोक्षदशायामखिलत्रैलोक्यान्तर्गतपदार्थसाक्षात्कारक्षमः पुरुष इति तदपीन्द्रजालम् तथापि चिद्रूपत्वे त्वात्मनः कृतं मनःषष्ठैरिन्द्रियैरित्यागन्तुकमेवास्य चैतन्यं न कार्यकरणादीनामावारकत्वे चैतन्याभावः ज्ञानाद्युपभोगार्थत्वेन सृष्टानामिन्द्रियाणां कार्यस्य तद्विरोधित्वानुपपत्तेः । यच्च विशिष्ट-



प्रदेशे क्षयशरीरादिप्राप्तिरपवर्ग इति, तदप्यसमञ्जसम्, कार्यत्वेन सावयवत्वेन च तेषां विनाशित्वानुमानादिति । अतः क्षपणकदर्शनेऽपि मोक्षतत्साधनोपन्यासो न ज्यायान् । तस्मात्तदपि न बुद्धिपूर्वकारिभिः समाश्रयणीयमिति तदप्युपेक्षमाणेन मया पुनः सुगतमतपरीक्षणमकारि । तदप्येवमिति भिक्षव आचक्षते । तथाहि—

## IV

प्रत्यक्षानुमानस्कन्धतत्वायतनानां प्रमाणप्रमेयानां तत्वज्ञानान्निश्रेयसाधिगम इति सुगतमतम् । अत्र कल्पनापोढमभ्रान्तं ज्ञानं प्रत्यक्षमिति प्रत्यक्षलक्षणमुच्यते । तत्र कल्पनेति नामजातिगुणक्रियाद्रव्ययोजना । तद्यथा — नामकल्पना देवदत्त इति । जातिकल्पना गौरिति । गुणकल्पना शुक्ल इति । क्रियाकल्पना पाचकः, पाठक इति । द्रव्यकल्पना दण्डी, विषाणीति । अनया कल्पनया रहितमर्थक्रियाक्षमे वस्तुरूपे अविपर्यस्तमभ्रान्तं च ज्ञान यत्तत्प्रत्यक्षमिति । तथा त्रिरूपालिङ्गाल्लिङ्गिनि ज्ञानमनुमानम् । रूपत्रयं च पक्षधर्मत्वं, पक्षे सत्वं, विपक्षे चासत्वमिति । एतस्मात्त्रिरूपान्निश्चिताल्लिङ्गाद्धर्मविशिष्टे धर्मिणि ज्ञानमनुमानमित्युच्यते । अभिमतत्त्वादिज्ञानं प्रमाणमिति च प्रमाणलक्षणमुच्यते । अविसंवादित्वादर्थक्रियास्विति । तथाहि नीलज्ञाने जाते, नीलप्रयुक्तार्थक्रियायां जातायां, तत्प्रमाणमिति निश्चिनोति । तदेव तदर्थक्रियाहेतुत्वं प्रत्यक्षानुमानयोः साधारणम् । प्रत्यक्षानुमाने द्वे एव च प्रमाणे । न प्रमाणान्तरं जागर्ति । शेषप्रमाणानामत्रैवान्तर्भावात् । प्रमेयद्वैविध्याद्धि प्रमाणं द्विविधमभ्युपगमनीयम् । अपरोक्षपरोक्षभेदेन तु द्विविधं प्रमेयम् । तत्र स्वलक्षणमपरोक्षम्, तथा सामान्यादि परोक्षं इति तद्विषये द्वे एव प्रमाणे । तत्र यद्यपि अनुमानमतद्रूपपरावृत्तिविषयत्वाद्वस्तु न गोचरयति, तथापि पारम्पर्येण वस्तुप्रतिबद्धत्वात् वस्तुप्राप्तिहेतुत्वेन तस्य प्रमाणोपपत्तिः । यथाहुः—

मणिप्रदीपप्रभयोर्मणिबुध्याभिधावतोः ।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति ॥

इति । आगम इति प्रमाणान्तरं नेष्यते । वस्तुप्रतिबद्धत्वाभावात् । यत्रार्थादर्थान्तरे प्रतिपत्तिः, तत्र कार्यकारणभावात् स्वभावाद्वा प्रामाण्यं जाघटीति । न खलु कार्यं कारणमन्तरेण न संभवतीति युक्तम् । कार्यात्कारणविशेषनिश्चयस्य

तादात्म्यमपि प्रतीतिप्रयोजकम् । नहि शिंशपात्वमुपलभ्यमानं वृक्षत्वं व्यभिचरतीति युक्तं शिंशपात्वाद्वृक्ष इत्यनुमानम् । शब्दस्त्वेवंविधसम्बन्धगन्धवन्ध्यः कथमर्थे प्रमाणीभवितुमुत्सहते । विवक्षा तु सूचयत्येव तत्कार्यत्वात् । अतश्चैत्यवन्दनात् स्वर्गो भवतीति वाक्यं कस्मिन्नर्थे विवक्षाद्वारकं प्रमाणीभवतीति सर्वं समञ्जसमेव । एवमुपमानाद्यपि प्रत्यक्षानुमानयोरेवान्तर्भवति । ततश्च प्रत्यक्षानुमाने द्वे एव प्रमाणे इति स्थितम् । तथा रूपादयः पञ्च स्कन्धाः । चक्षुरायतनादीनि द्वादशायतनानि च प्रमेयानि । तद्यथा - रूपवेदनासंज्ञासंस्कारविज्ञानानीति पञ्च स्कन्धाः । तत्र तावद्वर्णगन्धरसस्पर्शा इति चतुर्विधो रूपस्कन्धः । सुखवेदनादुःखवेदना मध्यमवेदना चेति त्रिविधो वेदनास्कन्धः । नेत्रसंज्ञा श्रोत्रसंज्ञा घोणसंज्ञा जिह्वासंज्ञा स्पर्शसंज्ञा मनःसंज्ञा चेति षड्विधः संज्ञास्कन्धः । मनोवाक्कायभेदैर्विंशतिप्रकारेणोक्तः संस्कारस्कन्धः । तत्र मानसा मिथ्यादर्शनरागद्वेषाः । वाचिका अनन्तरवचनपैशून्यवचननिन्दावचनविप्रलम्भवचनानि । कायिका हिंसापरस्वहरणमैथुनप्रयोगाः । एतानि दशाकुशलानि । एतेषां विपरीतनि च दश कुशलानि । तत्रापि मानसाः सत्वदर्शित्ववैराग्यस्नेहाः । वाचिकाः सत्यवचनानीर्ष्यावचनस्तुतिवचनसामवचनानि । कायिकाः अहिंसास्तेयब्रह्मचर्याणि इति । चक्षुर्विज्ञानं, घ्राणविज्ञानं जिह्वाविज्ञानं, स्पर्शविज्ञानं, श्रोत्रविज्ञानं मनोविज्ञानं चेति षड्विधो विज्ञानस्कन्धः । तथा चक्षुरायतनं, श्रोत्रायतनं, घ्राणायतनं, जिह्वायतनं, त्वगायतनं, मनआयतनं रूपायतनं, शब्दायतनं, गन्धायतनं, रसायतनं स्पर्शायतनं धर्मायतनमिति द्वादशायतनानि— इति । तेषां प्रमाणप्रमेयानां तत्त्वज्ञानान्निश्रेयसाधिगम इति सुगतमतम् ॥

तत्र चत्वारो बौद्धा भवन्ति । के ते? वैभाषिकः सौत्रान्तिको योगाचारो माध्यमिकश्चेति ।

तत्र वैभाषिकस्य तावद्बाह्यमाभ्यन्तरं च वस्तु प्रत्यक्षसिद्धमेवास्तीति मतम् । तत्र चेयं युक्तिः । यो यस्यावच्छेदकः स तस्याकार इति तावत् सम्मतम् । तेन संविदोऽपि । नीलमिदं पीतमिदमित्यादिरूपायाः नीलसंवित्पीतसंविदित्यादिप्रतिकर्मव्यवस्थाया अन्यथानुपपत्तेः नीलाद्यात्मनार्थाः पर्यायेणाकारेण भवितव्यमिति । स च स्वलक्षणापरनामा गन्धरसरूपस्पर्शज्ञानात्मक एव । तत्रैव हि प्रत्यक्षं चक्षुरादीनि व्याप्रियन्ते । यतः नान्योऽवयवी नाम, तस्य वृत्तिविकल्पादिना दुर्निरूपरूपत्वात् । तच्च कथमिति चेदुच्यते ।



## V

स खलु अवयवी नाम द्रव्यमेवेति भवद्भिरभ्युपगम्यते । तस्य पुनरुत्पत्तिमुपपत्तिमतीं न पश्यामः । तथा हि - द्व्यणुकादिक्रमेणैव हि स्थूलद्रव्यमारभ्यते इत्यभ्युपगम्यते । द्व्यणुकस्य तावदारम्भसंभवः कथमिति पृष्टः किमाचष्टाम् । न ह्येकैकेनपरमाणुना तदारम्भः संभवति । एकाकिनैव द्रव्येण द्रव्यान्तरारम्भस्यानुपपत्तेः । एकैकव्यतिरिक्तस्य चारम्भकस्यासंभवात् । न च संयोगवत्तयापि परमाणूनामारम्भकत्वं संभवति । संयोगस्यानेकद्रव्यनिष्ठत्वेनाभ्युपगमात् तदभ्युपगमस्य चैकैकव्यतिरिक्तानुपपत्यानुपपत्तेः । संयोगवत्तया च परमाणूनामारम्भकत्वे किमेकदेशेन न्ते संयुज्यते, सर्वात्मना वा । एकदेशेन चेत् , परमाणूनां सावयवत्वप्रसङ्गः । सर्वात्मना चेत् कार्यप्रथिमानुपपत्तिः । अनयैव दिशा युक्त्या द्व्यणुकत्रयारभ्यस्य महत्वेनाभिमतस्यत्र्यणुकस्याप्यारभ्यत्वं न संभवति । अतस्तत्क्रमेण स्थवीयांसि द्रव्याण्यारभ्याणीति का कथा ॥

किंच, अवयविनोऽवयवेषु प्रत्येकं कार्त्स्न्येन वा वृत्तिर्व्यासङ्गेन वा । कार्त्स्न्येन चेत् , तन्त्वादिनापि पटादिकार्यकरणप्रसङ्गः । व्यासङ्गेन विभज्य चेत् , एकतन्तुनाशेऽपराभावप्रसङ्गः । इत्यादिविकल्पासहिष्णुत्वादुत्पत्तिर्न युक्तिमती । अतस्तादृशद्रव्यानुपपत्तेः तदेकाश्रयतया जात्यादिविकल्पः कुतो वा कल्पताम् । कुतस्तरां च तेन संविदं प्रत्याकारेण भूयताम् । कुतस्तमां च तत्प्रतीतेः यथार्थता सामार्थ्यादवयविप्रतीतेश्च संहन्यमानगन्धादिपरमाणुविषयतया अन्यथासिद्धत्वात् न तदन्यथानुपपत्याप्यवयविसद्भावसिद्धिः । अतो गन्धादिरूप एवार्थः । स च प्रत्यक्षानुमानाभ्यां क्षणिकत्वेनावगम्यते । तत्र प्रत्यक्षस्तावत्–इदं नीलमिति नीले प्रवर्तमानं प्रत्यक्षं पुरोदेशिसम्बन्धितया वर्तमानक्षणसम्बन्धितया च नीलाकारं बोधयति । ततश्च यथा पुरोदेशसम्बन्धिनः देशान्तरेऽभावः तथा वर्तमानक्षणसंबन्धिनो नीलाकारस्य क्षणान्तरेप्यभावो बलादापतित इति प्रत्यक्षतः क्षणिकत्वं सिद्ध भवति ।

तथानुमानतोऽपि । इदमनुमानम् - विप्रतिपन्नं क्षणिकं सत्वात् । यत् सत्तत् क्षणिकम् । यथा जलधरः । सच्च विप्रतिपन्नं शब्दादि, तस्मात् क्षणिकमेव । यथाह—

यत्सत्तत्क्षणिकं यथा जलधरः, सन्तश्च भावा अमी
सत्ता शक्तिरिहार्थकर्मणि मितेः सिद्धेषु सिद्धा न सा ।

नाप्येकैव भिदान्यथापि परकृन्नैव क्रिया वा भवेद्
द्वेधापि क्षणभङ्गसङ्गतिरतः साध्ये च विश्राम्यति ॥

इति । (यद्यत्) क्रमवर्ति तत्तत्क्षणिकं दृष्टम्, यथा दीपज्वालादि । तथेदम् । तस्मात् क्षणिकमेवेति । विपक्षस्य विभुद्रव्यस्याकाशादेर्नित्यस्य सद्भावादनैकान्तिकमिति चेन्न । तस्यावरणभावमात्रत्वात् । न च स एवायमिति प्रत्यभिज्ञा । प्रत्यक्षस्य सद्भावात् । प्रत्यक्षविरुद्धतया कालात्ययापदिष्टत्वमाशङ्कनीयम् । स एवायमिति ज्ञानस्य प्रत्यक्षसहकृतानुमानद्वयबाधकत्वासंभवात् । सैवेयं ज्वालेत्यादिवद् भ्रान्ततयापि प्रत्यभिज्ञानस्योपपत्तेः । तस्मादिदमनुमानद्वयं निर्दोषमेव । अत एवास्ति बाह्यार्थः प्रत्यक्षसिद्ध इति वैभाषिकपरिभाषा । तदुक्तम्—

अक्षजा धीरनाकारा साक्षाद्वेद्योऽणुसञ्चयः ।
यद्यत् सावयवं तत्तदनित्यमिति तेऽवदन् ॥

इति । सौत्रान्तिकास्तु अनुमानबलादर्थमभ्युपागमन् । तथा हि - स्वतः स्वच्छस्य ज्ञानस्य वैलक्षण्यं परोपाधिकमेव भवितुमर्हति । ततश्च यत् ज्ञाने वैलक्षण्यापादकं, तद् बाह्यं वस्त्वस्ति इति प्रसिद्धं भवति । तथा संवेदनेषु विषयाकारप्रतिबिम्बावभासः तथाविधबिम्बात्मपुरस्सरः प्रतिबिम्बावभासत्वात्, दर्पणादिगतमुखादिप्रतिबिम्बावभासवत्; इत्यस्मादनुमानादपि बाह्यार्थः सिद्धो भवति । अनुमानसिद्धत्वे चार्थस्य क्षणिकत्वमपि पूर्वोक्तानुमानद्वयादेव सिद्धं भवति । अन्यत्तु सर्वं वैभाषिकमतसाधारणम् । तस्माद् बाह्योऽर्थोऽनुमेय एव । इति सौत्रान्तिकराद्धान्तः । तदप्युक्तम्—

साकारं ज्ञानमाकारदृश्या नेन्द्रियगोचरा ।
वन्ध्यासुतसमं व्योम निराधौ व्योमसन्निधौ ॥

संस्कारा अपि नासन्तस्त्रैकाल्यानुगमो न च ।
असदप्रतिघं रूपमिति सौत्रान्तिका विदुः ॥

इति ।

योगाचारस्य पुनर्निराकारज्ञानमेव परमार्थसदिति मतम् ॥



VI

कम्पाकम्परक्तारक्तत्वादिविरुद्धधर्मसंसर्गितया बाह्यार्थस्य सद्भावायोगात् तथा यत्प्रकाशते तत्प्रकाशाभिन्नम् । किंच - विज्ञानादर्था न भिन्नाः नियमेन सहोपलभ्यमानत्वात् । यथा सु (धांशवः) चन्द्रेण सहैवोपलभ्यन्ते । तस्माद् विज्ञानादर्था न भिन्नाः इति । किंच, सर्वे निरालम्बनाः प्रत्ययाः, प्रत्ययत्वात् । स्वप्नप्रत्ययवदिति । अतो ज्ञानातिरिक्तज्ञेयाभावादनादिकालीनवासनावशाद् विचित्रजगदवभासः । अतश्च ज्ञानमात्रमेवेदं विश्वमिति योगाचारस्य मतम् । तथा चोक्तम्—

प्रतिभासो निरालम्बः स्वप्नानुभवसन्निभः ।
ग्राह्यग्राहकनिर्मुक्तं विज्ञानं परमार्थसत् ॥

योगाचारमताम्भोधिपारगैरिति गीयते ।

इति । माध्यमिकस्य तु, विज्ञानमपि न परमार्थसत् । शून्यतैव हि परं तत्त्वमिति मतम् । ज्ञानस्य ज्ञेयाधीननिरूपणीयरूपत्वात् । तदभावे कथमिव स्वरूपलाभः । अतो ज्ञानमप्यस्तीति कथमिव वक्तुं शक्नुमः । न च सर्वस्याप्यभावे लोकयात्रोच्छेदप्रसङ्ग इति वाच्यम् । संवृतिपरिमितकल्पिततया प्रमाणादेः सर्वस्य सद्भावात् तन्निर्वाहोपपत्तेः । न च कल्पनाया अप्यधिष्ठानाभावादभाव इति युक्तम् । अशून्याधिष्ठानतया कल्पनाया अप्युपपत्तेः । ततश्च लोकयात्रादिकं सर्वं समञ्जसमेव । अतः शून्यतैव परं तत्त्वमिति माध्यमिकस्य मतम् । तच्चोक्तम्—

न पारमार्थिकः सोऽपि प्रतिभासो मतः सताम् ।
एकानेकस्वभावेन वियोगाद् गगनाब्जवत् ॥

न सन्नासन्नसदसन्नापरं नोभयात्मकम् ।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिकं विदुः ॥

(इति) । एते चत्वारोऽपि पक्षाः सर्वज्ञेनापि सुगतेनाधिकारिभेदमवलोक्य प्रदर्शिताः । सर्वं शून्यमित्येव तस्य परमः सिद्धान्तः । तथा चतुर्णां च सौगतानां वेदाप्रामाण्यं विकल्पस्यावस्तुविषयत्वं, ज्ञानातिरिक्तात्मनोऽभावः, संप्लवाभावः, अन्यापोहः

शब्दार्थः, प्रत्यक्षानुमानातिरिक्तमानान्तराभाव इत्यादयो धर्माः साधारणाः । तथा वेदप्रामाण्याभावादेव तन्मूलो वर्णाश्रमादिविभागोऽप्यनुपपन्न एवेति । तत्रापि का युक्तिरिति चेदुच्यते - यत् पुनरमी ब्राह्मणाः वेदाः प्रमाणमिति जल्पन्ति, ते तावत् प्रष्टव्याः—कथं वेदाः प्रमाणं भवति । अपौरुषेयत्वात्, उताप्तवचनत्वात् । अपौरुषेयत्वादिति चेत्तन्न घटते । अत्रानुमानम् - वेदाः पौरुषेयाः, वाक्यत्वात् । यद्यद्वाक्यं तत्तत् पौरुषेयं दृष्टम्, यथा कविवाक्यानि । तथैते । तस्मात् पौरुषेया एव । अथवा, अपौरुषेयत्वे सति प्रामाण्याभावः प्रसज्येत । अत्रानुमानम् - वेदाः प्रमाणं न भवति अबुद्धिपूर्ववाक्यत्वात् । यद्यदबुद्धिपूर्ववाक्यं, तत्तत् प्रमाणं न भवति । यथा सुप्तोन्मत्तप्रलपनानि । तथैते । तस्मादपौरुषेयत्वाच्च प्रामाण्यं न संभवति ॥ अथाप्तवचनत्वादिति चेत्, तच्च न घटते । 'अङ्गुल्यग्रे हस्तियूथशतं तिष्ठति' इत्येवमादिवाक्यानां यथानुपपन्नत्वात् प्रामाण्याभावः, तथा हिंसासाधनस्य ज्योतिष्टोमादिविधेः स्वर्गसाधनत्वमनुपपन्नमेव । वेदप्रणेतुराप्तिश्चाचिन्त्या । तस्माद्वेदाः प्रमाणं न भवत्येव । अत एव ब्राह्मणाश्च न भवन्ति । कथमिति चेत्—किं जात्या ब्राह्मण्यं, उत संस्कारात्, आहोस्विद्वेदाध्ययनात् । यदि जात्या, तत् प्रथमत एव विरुध्यते । कथमिति चेत्, प्रजापतेर्मुखतो ब्राह्मणा जाताः, बाहुभ्यः क्षत्रिया, ऊरुभ्यां वैश्याः, पद्भ्यां शूद्रा इति ननु श्रूयते । यदि मुखतो ब्राह्मणा जाताः, ब्राह्मणी कस्माज्जाता । मुखत इति चेद् भगिनी भवेत् । भगिनीविवाहस्तु श्रुतिस्मृतिनिषिद्धः । अन्यत्रोत्पन्ना चेत्, ब्राह्मण्यां जातो ब्राह्मणः कथं पुत्रं जनयेत् । तत् कथं गोत्रप्रवरादि संभवति । अथ चाविप्लुतस्य ब्राह्मणस्याविप्लुतायां ब्राह्मण्यां जातो ब्राह्मण इति ननु ब्राह्मणलक्षणम् । तच्च न संभवति । कुत इति चेत्, ब्रह्मण आरभ्याद्यतनब्राह्मणपर्यन्तं कस्यचिद् ब्राह्मणस्य कस्याश्चिद् ब्राह्मण्याः पतिव्यभिचारे तत्कुलं सर्वं विप्लुतं भवति । तस्माज्जात्या ब्राह्मण्यं नोपपद्यते । अथ संस्कारादिति चेत्–कस्यचित् शूद्रशिशोः गर्भाधानादिसंस्कारात् कृतोपनीतस्य किं ब्राह्मण्यं भवति । तस्मात् संस्काराच्च ब्राह्मण्यं न संभवति । अथ वेदाध्ययनादिति चेत्, कश्चिद्दाक्षिणात्यश्चाण्डालशिशुरुत्तरापथं गत्वा ब्राह्मणोऽहमित्युक्त्वा उपनयनादिकं कारयित्वा वेदमधीत्य किं ब्राह्मणो भवेत् । तस्माद्वेदाध्ययनाच्च ब्राह्मण्यं न संभवति । तस्माद् ब्राह्मणा न संभवन्त्येव ।



## VII

अथ च ज्योतिष्टोमादीनि कर्माणि फलदानीति न श्रद्धेयानि । कुत इति चेत्, बहुजनसाध्यत्वात्, मन्त्रसाध्यत्वात्, अर्थसाध्यत्वाच्च । ऋत्विग्भिः षोडशभिः संभूय ननु यागः कार्यः । तेष्वेकस्य सदोषत्वे सति तत्सर्वं दुष्टं भवति । मन्त्राणामपि सर्वेषां ऋषिच्छन्दोदैवतानि विज्ञेयानि । तत्र कस्मिंश्चिदज्ञाते, तस्य मन्त्रस्य फलं न सिध्यति । तथा चोक्तम् - अनृषिच्छन्दोदैवतविच्छ्रेयो मन्त्रेण नाधिगच्छतीति । मन्त्राक्षराणामपि ह्रस्वदीर्घप्लुतोदात्तानुदात्तस्वरितादि विज्ञाय मन्त्रोच्चारणं कर्तव्यम् । अन्यथोच्चारितस्य मन्त्रस्य निष्फलत्वं ब्राह्मणैरेवाङ्गीकृतम् । तथा च ब्राह्मणस्य ननु कर्माणि षड् विहितानि । यजनं याजनमध्ययनमध्यापनं दानं प्रतिग्रहश्चेति । तत्र याजनाध्यापनप्रतिग्रहाः प्रवृत्तिहेतवः । तैरेवार्थानुपादाय ननु यागः कर्तव्यः । न कृषिवाणिज्यवार्धुषिकादिभिरार्जितैरर्थैः कर्तव्यः । याजनादयो न सर्वविषयाः । अविप्लुता एव याजयितव्या अध्यापयितव्याश्च । विशुद्धादेव प्रतिग्रहश्च कार्यः । तस्मादर्थशुद्धिरपि दुर्लभा । किं तु, तत्सर्वमदुष्टमपि हिंसासाधनस्य यागस्य स्वर्गादिप्राप्तिर्न श्रद्धेया । तस्माद्यागादिकर्म चाकिञ्चित्करम् । एवं वेदप्रामाण्याभावः, ब्राह्मणादेरप्यभाव इति युक्तमेवोक्तमिति ।

तथा सर्वेषामपि सौगतानां क्षणिकनैरात्म्यादिभावना निश्रेयसजननीति स्थितिः । कथमिति चेत्—अहमित्यालयविज्ञानसन्तानानि स्थायित्वसुखित्वसात्मत्वसत्वकल्पनाभिरवच्छिद्यमानानि संसारमनुभवन्ति । ततश्च, तद्विरुद्धक्षणिकत्वदुःखित्वनिरात्मत्वशून्यत्वभावनया स्थायित्वाद्यनुसन्धाने क्रमेण मन्दीकृते विशुद्धविज्ञानोदयलक्षणः सर्वज्ञानसन्ततिपातो मुक्तिरिति । तथा चोक्तम्—

रागिवत् सार्थवच्चैव चक्रवन्मुष्टिवत्तथा ।
स्कन्धेषु पञ्चसु प्राज्ञैरात्मशब्दः प्रगीयते ॥

कर्म चास्ति फलं चास्ति कर्ता चास्तीह कर्मणाम् ।
अहो परमगम्भीरं दृष्टं तत्पदमद्वयम् ॥

जातं जातं प्रणश्येद्धि नष्टं नावर्तते पुनः ।
जायते च विजानाति ज्ञानमर्थद्वयं यथा ॥

एकमर्थं विजानाति, न जानाति द्वयं तथा ।
क्षणिकाः सर्वसंस्काराः स्थिराणां हि कुतः क्रिया ॥

भ्रान्तिर्यैषा क्रिया सैव कारकं सैव चोच्यते ।
अस्थिरो धर्ममात्मानं क्षणिकं सर्वसंस्कृतम् ॥

शान्तिर्निर्वाणमित्येषां धर्ममुद्रातिलक्षणा ।
इति च क्षणिकं सर्वमात्मशून्यमकर्तृकम् ॥

इति । एवं वदतो भिक्षूनाश्रित्य भदन्तं पक्षमखिलमश्रौषम् ।········

तदेतद्रक्ताम्बरैरभिहितं न विचक्षणपरीक्षाक्षममीक्षामहे । तथा हि—

यत्तावत् प्रत्यक्षानुमाने द्वे एव प्रमाणे इति तन्न चतुरश्रम् । आगमादि-लक्षणस्य प्रमाणान्तरस्य सद्भावात् । न चागमस्यानुमानेऽन्तर्भावो युक्तः । शब्दार्थयोरविनाभावानिरूपणात् । स्वभावात् कार्यकारणभावाद्वाविनाभाव इति हि तेषां मतम् । तत्र न तावत् शब्दार्थयोः स्वभावानुबन्धः वृक्षत्वशिंशपात्ववदेकार्थसमवायभाक् । नाप्यनयोः धूमाग्न्योरिव कार्यकारणभावः, शब्दस्यार्थाकार्यत्वात् । नाप्यनयोर्देशनियमः । यस्मिंस्निग्धच्छाया तस्मिंश्चैत्रमिति च । नापि कालनियमः । यस्मिन् घटिकाद्वये कृत्तिकोदयस्तस्मिन् रोहिण्यासक्तिरिति च । देशकालभेदोपलब्धेः । अतोऽविनाभावाभावात् शब्दो नानुमानेऽन्तर्भवति । एवमुपमानादीनामप्यनन्यथासिद्धस्वविषयशूराणां प्रत्यक्षानुमानाभ्यां भेदेन भवितव्यम् । ततश्च प्रत्यक्षानुमाने द्वे एव प्रमाणे इत्यनुपपन्नम् । यच्च कल्पनापोढमित्यादि प्रत्यक्षलक्षणमुक्तम्, तदप्यसमीचीनपक्षकुक्षिनिक्षिप्तम् । ग्राह्यांशे कल्पनायां भ्रान्तत्वेनाभ्रान्तपदेनैव व्यावृत्तिसिद्धेः कल्पनापोढमित्यस्य विशेषणस्य वैयर्थ्यात् । तथा त्रिरूपाल्लिङ्गादित्याद्यनुमानलक्षणमपि न साधु । अबाधितविषयत्वासत्प्रतिपक्षत्वलक्षणस्य रूपान्तरस्यावश्यमभ्युपेयत्वात् । अन्यथा, कालात्ययापदिष्टत्वाप्राकरणिकप्राकरणिकसमत्वप्रसङ्गात् । तथा, अविसंवादिविज्ञानमित्यादि प्रमाणसामान्यलक्षणमप्यसमीचीनमेव । अविसंवादित्वविशेषस्य व्यवहारोत्तरकालमध्यवसेयतया ततः पूर्वं प्रामाण्यनिश्चयायोगात् । ततश्च व्यवहारसिद्धौ प्रामाण्यनिश्चयसिद्धिः, प्रामाण्यनिश्चयसिद्धौ च व्यवहारसिद्धिः इत्यन्योन्याश्रयतया नोभयमपि सिध्यति । स्मृतिज्ञान-



सविकल्पकज्ञानाभ्यां चातिव्याप्नोति । स्कन्धपञ्चकद्वादशायतनानां तु लोकप्रसिद्धानामेव तैर्नामान्तरकरणात् किं नश्छिन्नम् । यच्च पुनर्वैभाषिकोऽर्थस्य प्रत्यक्षतामङ्गीकुरुते, तदस्माकमपीष्टमेव । यत्तु गन्धादिरूप एवार्थ इति, एतन्न मृष्यामहे । अवयवव्यतिरिक्तस्यावयविनः प्रतीतितो व्यवहारतोऽर्थक्रियातश्चोपलम्भात् । प्रतीतितस्तावद् बहुतन्तुव्यतिरेकेणैकाकारः पटः प्रतीयते । व्यावहारतोऽपि तन्तव इति पट इति च भेद उपलभ्यते । अर्थक्रियातोऽपि तन्तुकार्यव्यतिरेकेण पटस्यावरणाद्यर्थक्रियादर्शनात् । न चारम्भानुपपत्तेरवयविनोऽभाव इति वाच्यम्, संयोगसचिवानां परमाणूनामरम्भकत्वोपपत्तेः । निरवयवत्वेऽपि परमाणूनां संयोगस्यैकदेशवृत्तित्वस्वाभाव्यादेकदेशेन संयुज्यमानानां तेषामारम्भकत्वोपपत्तिः । ततश्च कार्यप्रथिमानुपपत्त्यादयो दोषा न प्रसज्येरन् । अवयविवृत्तिरप्यवयवेषु यावतामवयवानामभावेऽवयव्यभावप्रतीतिः, यावतां चावयवानां भावे अवयविसद्भावप्रतीतिः, तेष्विति रमणीयम् । तथा च किं व्यासङ्गेन कार्त्स्न्येन वेत्यादिविकल्पोऽकाण्डताण्डवित एव । न चार्थस्य क्षणिकत्वमपि युक्तम् । प्रमाणाभावात् । यत् पुनरत्र प्रत्यक्ष प्रमाणमित्युक्तम्, एतदपि न समञ्जसम् । न चेदं नीलमिति प्रत्यक्षं नीलस्य तदानीं सत्वं कालान्तरे चासत्वं बोधयति । बुद्धेरप्यव्याहाराभावात् । अर्थानां कालान्तरासत्वं बोधकत्वान्यथानुपपत्यभावादेवानुपपन्नम् । न चाकारस्यैवाभावाद् अनैकान्तिकत्वाभाव इति वाच्यम् । इह चक्षुर्लिङ्गमित्यादिप्रत्ययस्य सालम्बनतया आकारसद्भावसिद्धेः । क्षणिकत्वविपरीतरूपोपदर्शि प्रत्यभिज्ञालक्षणप्रत्यक्षविरुद्धकालात्ययापदिष्टं चानुमानद्वयम् । प्रत्यभिज्ञानं भ्रान्तमिति चेन्न ; अबाध्यमानत्वात् । प्रत्यभिज्ञायाः कालान्तरेऽपि न बाध उपलभ्यते । यत्पुनरत्र केनचिदुक्तं कारणाभावाद् विषयाभावाच्च न प्रत्यभिज्ञा प्रमाणीभवितुं शक्नोतीति, तदपि न सम्यक् । पूर्वानुभवजनितसंस्कारसनाथेन्द्रियस्य कारणस्य घटमानत्वात् । विषयोऽपि पूर्वकालैतत्कालकलितो विद्यत एवेति । तस्माद् वैभाषिकमतमसमञ्जसमेव ।

इदमहं जानामीति प्रत्यक्षसिद्धस्यार्थस्यानुमेयत्वं वदतः सौत्रान्तिकस्यानुभवने नैव विवाद इति । नास्माभिस्तत्र यतितव्यम् । कथं वा संवेदनानां विषयाकारतापि समधिगता । अनुभवबलादिति चेत्, तर्हि यथानुभवमर्थस्य प्रत्यक्षतैवाङ्गीकर्तव्या । न पुनर्बकबन्धविधिप्रयासेनानुमेयता इति सौत्रान्तिकमतमपि न समीचीनमिव दृश्यते ।

ज्ञानव्यतिरेकेण बाह्यस्य घटाद्यर्थस्य इदंकारास्पदतया उपलभ्यमानत्वाद् योगाचारमतमपि नोपादेयम् । कम्पाकम्पादिविरुद्धधर्मसंसर्गस्य चावयवभेदेनोपपत्तेर्न वस्त्वभावसाधकत्वम् । एतेन सहोपलम्भादयोऽप्यभेदहेतवः कालात्ययापदिष्टतया निराकर्तव्या इति ।

माध्यमिकास्तु सर्वप्रमाणविरुद्धभाषित्वात् सर्वथोपेक्ष्य एव । तथा हि । इदमहं जानामीति स्वसाक्षिकमेव प्रमातृप्रमेयादिकं वस्त्वनुभूय सर्वमसदेवेति वदन्कथमुपादेयवचनः स्यात् । सर्वशून्यत्वे च प्रमात्राद्यभावाल्लोकव्यवहारोच्छेदप्रसङ्गः । न च संवृतिपरिकल्पिततया व्यवहारनिर्वाहः, कल्पनाया अधिष्ठानसापेक्षत्वात् । असतश्च सत्कल्पनाधिष्ठितत्वासम्भवात् इति । तस्माच्चत्वारोऽप्येते पक्षा नादरणीयाः ।

एतैः सौगतैर्व्यादिश्यमानाः वेदाप्रामाण्योपपादनादयः साधारणधर्माश्च निराकर्तव्याः । तत्र वेदप्रामाण्यं तावदुत्तरत्र साधयिष्यते । विकल्पस्य तु जात्यादर्थस्य सद्भावादवस्तुविषयत्वमनुपपन्नम् । ज्ञानातिरिक्तस्य चात्मनः प्रत्यभिज्ञानबलादाश्रयणीयत्वात् तदभावोऽप्यनुपपन्नः । तथा हि योऽहं बाल्ये पितरावन्वभूवं स एवेह च प्रणयमनुभवामीति प्रत्यभिज्ञाया बाल्ययौवनादिष्वनुगत एक आत्मा प्रतीयते । तथा क्षणिकस्य ज्ञानस्य तदनुगमायोगाच्च तदतिरिक्तेनात्मना प्रत्यभिज्ञाविषयेण भवितव्यम् । तथा संप्लवाभावेऽपि विकल्पस्य वस्तुविषयादेवानुपपन्नः प्रत्यक्षानुमानातिरिक्तप्रमाणान्तरस्य साधितत्वात् तदतिरिक्तप्रमाणाभावोऽपि वाङ्मात्र एव । गोत्वस्याप्रतिपत्तौ अगोत्वव्यावृत्त्यसिद्धेः, अगोत्वव्यावृत्तिप्रतिपत्तौ गोत्वप्रतिपत्त्यसिद्धेश्चान्योन्याश्रयतयोभयसिद्ध्यभावप्रसङ्गात् नान्यापोहः शब्दार्थः । तथा वेदप्रामाण्यसंभावादेव च तन्मूलवर्णाश्रमादिविभागोऽपि संभवत्येव । यत् पुनरुक्तं वेदस्यापौरुषेयत्वं न संघटते वाक्यत्वादिति, तच्चासत् । वेदस्यापौरुषेयत्वे प्रमाणान्तरसद्भावात् । तथा चानुमानम् -अपौरुषेया वेदाः सम्प्रदायविच्छित्तौ अस्मर्यमाणकर्तृकत्वात् । यद्यत् सम्प्रदायविच्छित्तौ अस्मर्यमाणकर्तृकं तत्तदपौरुषेयं दृष्टं यथाचलादि । तथा चैते । तस्मादपौरुषेया एव यत्पुनरुक्तं अपौरुषेयस्य प्रामाण्यं न संभवतीति तच्चासत् । वेदस्य स्वतःप्रामाण्यसभवात् । केन तत्प्रामाण्यमङ्गीकियत इति चेद्, वेदैकदेशस्य दृष्टफलत्वात् । तथा हि-कारीरियागे कृते तदैव वृष्टिरुपलभ्यमाना दृश्यते । तथैव चित्रयागे कृते पशवोऽप्युपलभ्यन्ते । तस्मात् प्रमाणमेव वेदाः । तथा पौरुषेयत्वेऽपि प्रामाण्यमस्त्येव वेदस्य । कथमिति चेत—आप्तवचनत्वात् । यत् पुनरुक्तं वेदप्रणेतुराप्तिश्चापि चिन्त्या इति । तच्चासत् । जगत्कर्तुरीश्वरस्याचिन्त्यप्रभावत्वात् । तथा चोक्तं मनुना—



पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥

तस्माद्वेदाः स्वतःप्रमाणम् । यत् पुनरुक्तं हिंसासाधनेन यागेन स्वर्गप्राप्तिरनुपपन्नेति, तच्चासत् । हिंसाया अपि विहितत्वात् । कथं विहितत्वम्, न हिंस्यात् सर्वभूतानीति भवतां पक्षे हिंसाप्रतिषेधोऽङ्गीक्रियत एव नन्विति चेन्न, तस्य सामान्यविधित्वात् । सामान्यविधिर्विशेषविधिना बाध्येत । अग्निष्टोमस्य पशोर्हिंसाया विशेषविहितत्वात् तस्या न दोषः । तस्माच्च वेदाः प्रमाणमेव । यत्तूक्तं ब्राह्मणा न भवन्तीति, तच्चासत् । जात्या संस्कारैः वेदाध्ययनेन च त्रिभिः समुदितैर्ब्राह्मण्यं भवति, न त्वेकेन । यत्तूक्तम्—प्रजापतेर्मुखतो ब्राह्मणा जाताः, तत एव ब्राह्मणी च, तस्माद्भगिनीति, तच्चासत् । एकस्माद् देशाज्जातानां सर्वेषां भ्रातृत्वमस्तीति, नन्विदं कस्मात् । गोत्रप्रवरादयश्च सन्त्येव । यत्पुनरुक्तम्—अविप्लुतत्वं न संभवतीति असावेव विप्लुतः । अथवा दोषाणां रहस्यानां च प्रकाशितानां प्रायश्चित्तविशेषाः सन्ति । एषु कृतेष्वपि शुद्धिर्भवति । अथ च विधिवत् सन्ध्योपासनादि कुर्वन् ब्राह्मणो दोषैर्न लिप्यते । तथा च तन्मात्रार्थः । तस्मादविप्लुतत्वं संभवत्येव । यत् पुनरुक्तं संस्कारेण ब्राह्मण्यं संभवतीति, तच्चासत् । संस्कारस्तावत् यस्य यस्य यो यः संस्कार उचितः तस्य तस्य तेन संस्कारेणैव संस्कृतत्वं भवति, नान्येन - तस्माद् ब्राह्मणस्यैव गर्भाधानादिभिः संस्कारैः संस्कृतत्वं भवति । अन्यस्यासंस्कृतस्य सर्वस्य स्वार्थापादनसामर्थ्यं न संभवति । तस्माद् ब्राह्मणोऽपि संस्कारविहितोऽविप्लुतोऽपि भवति । तस्मात् संस्कारोऽपि कर्तव्य एव भवति । अथ वेदाध्ययनमपि ब्राह्मणस्य कर्तव्यमेव । षट्कर्माण्यपि ब्राह्मणस्यैव विहितानीति । यत् पुनरुक्तम्—ज्योतिष्टोमादीनां विधिवाक्यानां स्वर्गादिक फलमश्रद्धेयमिति । तत्राप्युत्तरं दत्तपूर्वम्, कारीर्यादीनां विधिवाक्यानां प्रत्यक्षफलत्वात् । बहुजनसाध्यत्वात्, मन्त्रसाध्यत्वात्, अर्थसाध्यत्वादिति ये हेतवः प्रयुक्तास्तेषां सर्वेषामप्युत्तरं प्रायेण पूर्वमुक्तं भवति । यद्येकस्य किंचिद्वैकल्यं भवति, तत्र तत्परिहारार्थं ननु तत्प्रायश्चित्तानि क्रियन्ते । तस्माद् ब्राह्मणा अपि सन्त्येवेति । तथा येषां सौगतानां पक्षे नास्त्यात्मा तेषां बोधिप्राप्तिरपि दुर्लभा । आत्मनो हि सर्वेषां पक्षे बोधिप्राप्तिरुच्यते । अनात्मनः कस्य पुनः क्षणिकनैरात्म्यादिभावनातो बोधिप्राप्तिः संभवति । तस्मान्निस्सारोऽयं पक्षः । इति सौगतसमयोऽप्यसौ नादिष्टोपाय इति विमृश्य हि निर्णित इति ॥

—: * :—

# SAVYABHICHĀRA SĀMĀNYA NIRUKTI VYĀKHYĀ

## ॥ सव्यभिचारसामान्यनिरुक्तिव्याख्या ॥

by
**KRISHNABHATTA**

*Edited Critically by*
S. SUBRAHMANYA SASTRI, M.A., (Siromani)
Reader in Sanskrit
UNIVERSITY OF MADRAS
MADRAS

MADRAS UNIVERSITY
1961

128639

## SAVYABHICHĀRA SĀMĀNYANIRUKTI

Savyabhichāra Sāmānyanirukti is a sub-section in Anumāna Pariccheda the second chapter of Tatvachintāmaṇi by Gangesa Upadhyāya. Tatvachintāmaṇi is divided into four chapters dealing with Pratyakṣa (Perception), Anumāna (Inference) Upamāna (Comparison) and S'abda (verbal testimony) respectively, the four pramanas accepted by the Naiyāyikas. Tatvachintamani is the first work in Navya Nyāya which synthesises the Nyāya and Vais'eṣika Schools. In this, his epoch-making work, Gangesa, treats each topic called vāda in the purvapakṣa - siddhānta method, devoting the first part to pūrvapakṣa and the second to siddhānta. In the first Pariccheda of Tatvachintamani discussions on Mangala, and Prāmaṇya, Anyathākyāti, etc. pertaining to perception are held. The second chapter solely treats of Inference (Anumānā). Inference is twofold, the valid reason (Sadhetu) and the erroneous reason (hetvābhāsa). These latter should also be learned for the sake of eschewing them in our arguments and pointing them out in the arguments of the opponent when debates are held. There are five hetvābhāsas by name Savyabhichāra, Vruddha, Satpratapakṣa Asiddha and Bādhita. Gangesa first deals with the general definition of these hetvābhāsas and then proceeds to define them individually. Savyabhichāra, the first fallacy has three varieties called Sādhāraṇa Asādhāraṇa and Anupasamhārin. Before defining them separately, Gangesa discusses what could be the general definition of Savyabhichāra which brings together its three varieties. This portion of Tatvachintamani is called Savyabhichāra Sāmānyanirukti. Here too Gangesa gives the primafacie definition. It is this: That which brings about the recollection of the two alternatives conducive to doubt about the ***probandum*** is Savyabhichāra, Sādhārana is a probans which exists in places where the prabandum and its absence are determined. Asādhāraṇa is a ***probans*** which is absent in both of them. Anupasamhārin is that which has a universal subject (minor term). The definition given above is applicable to all these three reasons. But Gangesa rejects this and other definitions saying that they are not useful in uprooting the arguments of the opponent. But

curiously enough Gangesa gives the same definition as his Siddhanta (final view) not answering his own objections upon them. But the commentator Raghunatha Sūrin intervenes and defends Gangesa saying that though those definitions are not helpful in uprooting the vādin's arguments they are useful in classifying them and thus they are correct definitions. Gadhādhara's Tippaṇi is a commentary on *Dhīdhiti* of Ragunatha Siromani. The following pages form the super-commentary on Didhiti called *Gādādharī Tippaṇi* by Krishṇa Bhaṭṭa a great genius in Nyaya from Maharashtra country, born in the 18th century. Though he has written commentaries on all the works of Gadādhara, few have seen the press, and fewer still have been published in Devanagiri letters. It is hoped that the publication of this rare and useful commentary of Krishṇa Bhaṭṭa will help greatly the students of Navya Nyaya.

**S. Subrahmanya Sastri**



साहचर्यावच्छिन्नप्रकारताशालिज्ञानत्वेन हेतुतया सद्धेतौ धर्मितावच्छेदकेऽतिव्याप्तिरिति भावः । **धर्मितेति** । फलीभूतसंशयधर्मितेत्यर्थः । एवमग्रेऽपि । अर्थस्तूक्तः । नन्वत्र प्रमेयत्वादिविशिष्टधूमतदभावसहचर्यस्यापि यद्रूपपदेनोपादानप्रसङ्गः । यद्यपि दुष्टलक्षणे नातिव्याप्तिः तथापि अत्र साध्यवदभावसाहचर्यादेरेव दोषतया प्रमेयत्वविशिष्टे तत्रातिव्याप्तिर्दुर्वारा ।

विशिष्टान्तराघटितत्वनिवेशे च गौरवमित्यतः कल्पान्तरमाह—**साध्येति** । न च स्वरूपसम्बन्धरूपजनकतावच्छेदकतानिवेशेऽपि प्रमेयत्वादिविशिष्टधूमादिसाहचर्यावच्छिन्नप्रकारतायाः शुद्धतत्साहचर्यावच्छिन्नप्रकारतात्वेन जनकतावच्छेदकत्वात्तद्दोषतादवस्थ्यवारणाय विशिष्टान्तराघटितत्वप्रवेशो दुर्वार इति वाच्यम् ; यद्रूपपर्याप्तावच्छेदकताकप्रकारतात्वं जनकतावच्छेदकतावच्छेदकं तद्रूपवत्त्वस्योक्तत्वात् ।

यद्वा नन्वेवं नित्यत्वादिविषयकज्ञानवानयं नित्यो न वेत्यादिसंशये धर्मितावच्छेदकप्रकारकज्ञानमुद्रया नित्यत्वादिविषयकज्ञानवानयं नित्यत्वादिविषयकज्ञानवानित्याकारकज्ञानस्य हेतुतया नित्योज्ञानादित्यादावतिव्याप्तिः वह्नितदभावसहचरितधूमवानित्यादिज्ञानमादाय धूमादावप्यतिव्याप्तिरित्यतः कल्पान्तरमाह—**साध्येति** । तादृशविशेष्यतानिरूपितत्वावच्छिन्ना या जनकतावच्छेदकता तद्वत्प्रकारतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वस्य वाच्यत्वान्न दोष इति भावः । **ज्ञानस्यैवेत्ये**वकारेण वह्निमद्वृत्तिवह्न्यभाववद्वृत्त्यावृत्तत्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन कारणताया अलीकत्वसूचनयाऽऽतिव्याप्तिशङ्कानवकाशः सूचितः ।

**विशेष्येति** । तथा च पृथक्कारणत्वेऽतिप्रसङ्गो दुर्वारः । धर्मिविशेषणतापन्नसाहचर्यद्वये प्रकारतावच्छेदकतां निवेश्य कार्यकारणभावोक्तावाह – **व्याप्येति** । **तत्रेति** । तथा च तत्र कारणतावच्छेदकासत्त्वेन ततो व्यापकसंशयानुपपत्तिरिति भावः । **ग्रन्थेति** । ज्ञानपदस्य निश्चयपरत्वावश्यकतया पाक्षिकत्वाभिधानानुपपत्तेरिति भावः । **यद्रूपेति** । क्रमेण पक्षयोः परिष्कारः यो य इति वीप्साया अभिधानेऽपि सम्भवतामेव धर्माणामुपग्रहणम् । तथा च यत्र न धर्मान्तरं संभवति तत्रैकधर्मस्यैवोपादानं दुर्वारमित्याशयेन दूषयति—**सत्तेति** ।

वीप्साया लक्षणे निवेशात्तत्र तादृशधर्मान्तराभावान्नातिव्याप्तिरित्युक्तावप्याह—**वस्तुतस्त्विति** । तादृशावच्छेदकताव्यापकाधेयताकत्वोक्तावप्ययमेव दोषः । **तादृश**-

**धर्मतयेति** । असाधारण्यादेरपि तत्साध्यकसाधारणांशे प्रकारतावच्छेदकत्वात्स्वनिष्ठत्वं धर्मिविशेषणं, स्वनिष्ठतादृशधर्मान्तराभावान्न व्याप्येऽतिप्रसङ्गः । अत एव स्वनिष्ठधर्मनिष्ठतादृशावच्छेदकताव्यापकाधेयताकत्वमत्र न विवक्षितं व्याप्येऽतिप्रसङ्गापत्तेः । स्वनिष्ठत्वोपादाने दोषमाह—**व्याप्यसंशयेति** । पृथक्कारणतामतेऽपि स्वनिष्ठतादृशयावद्धर्माप्रसिद्ध्या अतिव्याप्त्यसत्वाज्ज्ञानपदस्य निश्चयपरत्ववैयर्थ्यादिति भावः । तत्त्यागेऽसम्भवं स्मारयति—**साधारणादेरसाधारण्यादीति** ।

अथवा स्वनिष्ठत्वं प्रकारताविशेषणं साधारणादेरसाधारण्यादिना भ्रमो नास्तीत्यभिमानेनासम्भवोद्धारः । अभिमानं निराकृत्य स्वनिष्ठत्वसत्वेऽप्यसंभवस्य साधारणादेरित्यादिना प्रदर्शनं, व्याप्याभावत्वेन व्याप्यज्ञाने तदज्ञाने वा स्वनिष्ठप्रकारतावच्छेदकयावद्धर्मसत्वेनातिव्याप्तेरेवासत्वाद्व्यापकसंशयस्येत्यादिग्रन्थासङ्गतिरप्यादिपदेन ग्राह्या । **एतेनेति** । असाधारण्यादेस्तादृशधर्मत्वासंभवेनेत्यर्थः । **यद्धर्मिणीति** । साध्यसंशयपदेन ग्राह्या ।

**एतेनेति** । असाधारण्यादेस्तादृशधर्मत्वात् जनकतात्वेन धर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रकारताशालिज्ञानत्वस्य तदवच्छिन्नसहकारितावच्छेदकीभूतस्य तथाविधयद्रूपावच्छिन्नप्रकारताशालित्वज्ञानस्य च व्यापकता तदुभयरूपवत्त्वस्य तादृशविशेष्यतानिरूपितत्वविशिष्टस्वपर्याप्तावच्छेदकताकप्रकारतात्वेनावच्छिन्नसाध्यसंशयजनकतावच्छेदकताको यो धर्मः यश्च तदवच्छिन्नप्रकारत्वावच्छिन्नसहकारितावच्छेदकप्रकारतावृत्तितादृशविशेष्यतानिरूपितत्वविशिष्टस्वपर्याप्तावच्छेदकताकप्रकारतात्वेनावच्छिन्नसाध्यसंशयजनकतावच्छेदकताको धर्मस्तदुभयवत्त्वस्य वा विवक्षितत्वान्न दोषः । एकैककोटिसाहचर्यावच्छिन्नप्रकारताशालिज्ञानत्वादिना पृथगेव हेतुत्वोपगमादिति । एवं च व्याप्यसंशयस्य साधारणधर्मान्तर्भावोऽप्युपपन्नः साध्यसाहचर्यावच्छिन्नव्याप्यवत्ताज्ञानस्य साध्याभावसाहचर्यावच्छिन्नसाधनाभाववत्ताज्ञानसहकारित्वादित्यर्थः ।

स्वनिष्ठेत्यादि काचित्कम् लक्षणसमन्वयसूचकम् । **स्वनिष्ठेति** । संशये विशेष्यताभेदमते सहकारित्वोपपत्तावपि तदुभयरूपवत्वं नास्तीति सूचनाय । उभयप्रकारकज्ञानत्वेन कारणतामते तु सहकारित्वमपि नेति बोध्यम् । संशये यत्किञ्चित्त्वं निवेश्य यावत्प्रकारतानिवेशकल्पं परिष्कृत्य समाधत्ते—**यत्किंचिदिति** । संदेह-



स्तद्धर्मपर्याप्तधर्मितावच्छेदकताकः । तेन नित्यत्वादिविषयकज्ञानवानयं नित्यो न वेत्यादिसंशयजनकस्य नित्यत्वादिज्ञानवानयमिति ज्ञानस्य व्युदासः । विशेष्यता च तद्धर्मपर्याप्तावच्छेदकताका । एतल्लाभाय—**धर्मितावच्छेदकावच्छिन्नेति** । कोट्युपस्थित्यादिवृत्तिजनकतामादायासंभवोऽतो निरूपितत्वान्तम् । नित्यत्वादिविषयकज्ञानवानयं नित्यत्वादिविषयकज्ञानवान् इति ज्ञानवारणं प्राग्वत् । साध्यज्ञानजनकतावच्छेदकधूमादिप्रकारतावारणाय—**संशयेति** । यावत्प्रकारतानिवेशफलमाह—**साधारण्यादीति** ।

अत्रेदं बोध्यम् । या या प्रकारता प्रकारतात्वेन साध्यसन्देहजनकतावच्छेदिकेति दोषलक्षणे प्रमेयत्वविशिष्टे व्यभिचारवारणाय साध्यसन्देहजनकतावच्छेदकता यादृशावच्छेद्यत्वावच्छिन्ना तादृशावच्छेद्यतानिरूपकतापर्याप्त्यधिकरणत्वं जनकतावच्छेदकतावच्छेदकीभूतावच्छेद्यतानिरूपकतावच्छेदकतापर्याप्त्यधिकरणत्वरूपं दोषत्वम्, दुष्टलक्षणे त्वेतादृशविवक्षा निष्प्रयोजनेति । **व्याप्येति** । व्याप्याभाववत्ताज्ञानत्वेन तु न कारणत्वं तन्निश्चयात् साध्यसंशयापत्तेः तस्याप्रतिबन्धकत्वात् ।

**अप्रामाण्यनिश्चयेति** । व्याप्यवत्ताज्ञानस्य कारणत्वे व्याप्यनिश्चयेऽप्रामाण्यसंशयो न व्यापकसंशयानुत्पत्तिप्रयोजकः तत्र विषयसंशयद्वारा तत्संशयस्यावश्यकत्वात् । क्षणैकविलंबस्य शपथनिर्णेयत्वात् । व्याप्यवत्तासंशयस्य कारणतामते अप्रामाण्यनिश्चयाभाव एव निविशते । तत्राप्रामाण्यसंशयस्याकिञ्चित्करत्वात् । तत्सत्वेऽपि अव्यवहितोत्तरक्षणे व्यापकसंशयोत्पत्तिसंभवादिति सूचनायैवकारः । **व्यापकसंशयापत्तिरिति** । न चेष्टापत्तिः तत्र तृतीयक्षणे व्यापकसंशयस्यावश्यकत्वात् । कालस्यातिसूक्ष्मतया तत्पूर्वक्षणे तस्य स्वीकर्तव्यत्वादिति वाच्यम् । यत्राप्रामाण्यसंशयेऽपि न विषयसंशयः नापि साधारणधर्मदर्शनादिकं तत्र व्याप्यसंशयद्वारा, अन्यथा वा तस्यासत्वेनापादनीयत्वात् । **न जाते इति** । तथा चाप्रामाण्यनिश्चयानास्कन्दितव्याप्यवत्तानिश्चयरूपप्रतिबन्धकमेव दुर्लभमिति भावः ।

प्रसिद्धस्थलसंग्रहानुरोधेनाह—**अथवेति** । व्याप्यसंशयत्वं व्याप्यतदभाववत्ताज्ञानत्वं अप्रामाण्यनिश्चयत्वं अप्रामाण्यसंशयान्याप्रामाण्यज्ञानत्वं, तत्र व्याप्याभावज्ञानविशिष्टत्वं अप्रामाण्यसंशयविशेषणं तथाच व्याप्याभावज्ञानविशिष्टाप्रामाण्यज्ञानान्यत्वं अन्यस्वान्तार्थः संशयत्ववैयर्थ्यात् ।

**इदमापाततः ।** यत्र प्रथमक्षणे वह्निव्याप्यवत्तानिश्चयस्ततःतद्धर्मिकाप्रामाण्यसंशयरूपव्याप्याभाववत्तानिश्चयस्तत्र व्यापकसंशयापत्तेर्दुर्वारत्वात् । **अभावादिति ।** न व्याप्यसंशयत्वेन व्यापकसंशयहेतुत्वमावश्यकमित्यत्र हेतुः । व्याप्याभावप्रकारकत्वघटितसंशयत्वोत्कीर्तनवैयर्थ्यवारणाय संशयत्वेन हेतुतामालम्ब्याह—**अथवेति ।** **सव्यभिचारितेति ।** अन्यथा नित्यो ज्ञानादित्यादौ विषयतया नित्यत्वानित्यत्वसहचरितज्ञानवत्ताज्ञानमादाय समवायेन सव्यभिचारित्वप्रसङ्गः ।

**व्याप्येति ।** सव्यभिचारिताघटकसंबन्धावच्छिन्नतादृशप्रकारतात्वव्यापकस्ववृत्तिधर्मनिरूपितावच्छेद्यताकत्वरूपलक्षणासत्वात् । एवमग्रेपि । **धर्मैक्यस्येति ।** साधारणधर्मान्तर्भावपक्षे व्याप्यत्वव्याप्यत्वावच्छिन्नाभावत्वयोर्भेदात् । एवञ्च संबन्धस्यापि तत्तुल्यतयाऽप्रयोजकान्तम् संयोगाद्यभावीयविशेषणतादिरूपसम्बन्धभेदाच्च साहचर्यावच्छिन्नप्रकारतायाःतद्घटितसम्बन्धावच्छिन्नाया एव साध्यसंशयप्रयोजकत्वमिति सूचनाय—**विषयतयेत्यादि ।**

या या विशेष्यता तन्निरूपिता न कापि प्रकारतेत्यतो या या प्रकारतेति । स्वयं संशये तथाविधैकविशेष्यताया अनङ्गीकारादाह—**मते इति ।** उपायकृन्मते इत्यर्थः । आदिना यावद्विशेष्यताघटितकल्पपरिग्रहः । कोट्युपस्थित्यादिवृत्तिजनकतावारणाय—**धर्मितेत्यादि ।**

ननु संशयं प्रत्युभयकोटिसाहचर्यावच्छिन्नप्रकारताशालिज्ञानत्वेनैकजनकत्वात्तदवच्छेदकीभूतविशेष्यतामादाय व्याप्यविरुद्धयोरतिव्याप्तिरित्याशङ्कां तत्र कारणताभेदं स्मारयन् परिहरति—**संशयं प्रतीति ।** एतदेव च जनकतायां यावत्त्वोपादानप्रयोजनम् । तदुपादाने च तादृशजनकतात्वव्यापकस्ववृत्तिधर्मपर्याप्तावच्छेदकताकसव्यभिचारिताघटकसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावृत्त्यवच्छेदकतावच्छेदकताकत्वमर्थः । तत्र च तादृशी या या जनकता तदवच्छेदकप्रकारतेत्यादिरीत्या निवेशोऽपि न दोष इत्यवधेयम् ।

**स्वांशे इति ।** व्याप्याभाववत्तानिश्चयसंपत्त्यर्थम् । **व्यापकसंशयापत्तेरिति ।** अप्रामाण्यनिश्चयाभावस्यैव जनकतावच्छेदकत्वात् । **एतेन** यावत्प्रकारताकल्पे धूमादिसहचरितकाञ्चनमयवह्निमानिति ज्ञातीयप्रकारताया यावदन्तर्गततयाऽसम्भवभयेन



यावज्जनकताघटितकल्पमादृत्य ज्ञानपदस्य निश्चयपरताकथनेन । यावद्विशेष्यताघटितकल्पं निराकर्तुमाह—**एवं चेति ।** **न युक्तमिति ।**

इदमुपलक्षणम्—प्रकारतायां सव्यभिचारताघटकसम्बन्धावच्छिन्नत्वं न निवेश्यम् । किं तु यावत्प्रकारतावच्छेदकधर्म एव सव्यभिचारिताघटकसम्बन्धावच्छिन्नाधेयताघटितस्वम् । एवं च व्याप्यसंशयमादायादोषाज्ज्ञानपदस्य निश्चयपरत्वं व्यर्थमित्यपि बोध्यम् । व्याप्यसंशयस्य साधारणधर्मान्तर्भावमते यादृशं लक्षणं तादृशमेव पृथक्कारणतामते इत्येतन्न सम्भवति, अन्तर्भावमते कोटिद्वयसामानाधिकरण्यावच्छिन्नत्वेन प्रकारताया जनकतावच्छेदकत्वासम्भवात् । पार्थक्यमतेन तत्कोटिसामानाधिकरण्यावच्छिन्नत्वेन प्रकारतयोः प्रत्येकं जनकतावच्छेदकत्वस्य प्रामाणिकत्वादित्यालोच्य प्रकारान्तरेण व्याप्यसंशयस्येत्यादिग्रन्थं सङ्गमयितुमाह—**अथवेति ।**

**दुर्वारयेति ।** न च वह्नित्वद्रव्यत्वादिधर्मान् विशिष्यानिवेश्य कारणताद्वयं कल्प्यते । सहकारितावच्छेदकमपि एकतरसाहचर्यावच्छिन्नप्रकारताकज्ञानत्वमेव । परं तु तत्र प्रकारतायां स्वावच्छिन्नत्वस्वान्यसाहचर्यधर्मितावच्छेदकधर्मानवच्छिन्नत्वोभयसम्बन्धेन स्वविशिष्टत्वं निवेश्यमिति न संशयापत्तिः । न वा कारणतानन्त्यमिति वाच्यम् । ईदृशपरंपरायाः सम्बन्धत्वे मानाभावात् । **कारणतानन्त्यापत्तेरिति ।** अस्माकं तत्तत्कोटिसाहचर्यस्य धर्मितावच्छेदकानिवेशेन द्रव्यत्ववह्नित्वाद्यनन्तधर्मितावच्छेदककज्ञानेषु विशेषणविशेष्यभावभेदेन द्वय्येव कारणता न तु तदानन्त्यमिति भावः । व्याप्यसंशयस्य साधारणान्तर्भावमते तदसंग्रहापत्त्या एकहेतुत्वासम्भवात् अनायत्या धर्मितावच्छेदकमप्रवेश्य द्वयी कारणता स्वीकार्येति बोध्यम् ।

**अथेति ।** सतिसप्तम्याः सामानाधिकरण्यमर्थः हेतुतावच्छेदकसम्बन्धश्च समवाय एवेत्याशयेन शङ्का । साहचर्यावच्छिन्नवत्ताज्ञानत्वेन न संशायकत्वं साहचर्यांशे निर्धर्मितावच्छेदकतज्ज्ञानादपि संशयप्रसङ्गात् । अतः तद्धर्मावच्छिन्नसाहचर्यावच्छिन्नधर्मज्ञानस्य साहचर्यावच्छेदकधर्मविशिष्टवत्ताज्ञानस्य वा विनिगमनाविरहात् कारणत्वम् ।

अथवा व्यभिचारिहेतुप्रयोज्यः साध्यसंशयः तत्प्रमाजन्य एव सद्धेतुप्रयोज्यश्च तद्भ्रमजन्य एवेति नियमात् साहचर्यावच्छेदकधर्मावच्छिन्नवत्ताज्ञानस्यैव तथात्वमुप-

गम्य समाधत्ते—**साध्येति ।** तथाच धूमवान् वह्नेरित्यादौ क्वापि वह्नौ साध्यतदभावसाहचर्यासत्वेऽपि नाव्याप्तिः । उभयसाहचर्यावच्छेदकत्वविशिष्टधर्मविशिष्टवैशिष्ट्यावगाहिज्ञानत्वेनेव उभयसहचरितवृत्तित्वविशिष्टधर्मावच्छिन्नत्ववत्ताज्ञानत्वेनापि संशयहेतुतया अतिव्याप्तिमाशङ्क्य निराकरोति—**उभयेति ।**

**यादृशेति ।** यादृशयादृशधर्मावच्छिन्नयन्निष्ठनिरूपकतावच्छेदकताकाधिकरणतात्वविशिष्टावच्छिन्नप्रकारत्वं यादृशयादृशधर्मावच्छिन्नयन्निष्ठावच्छेदकताकतदवच्छिन्ननिरूपकत्वविशिष्टसम्बन्धावच्छिन्नप्रकारत्वं वा संशयजनकतावच्छेदकं तादृशतादृशधर्मविशिष्टतद्वत्त्वमर्थः । उभयवृत्तितानवच्छेदकत्वविशिष्टवह्नित्वावच्छिन्नवत्ताज्ञानमादाय साधारणासम्भववारणाय **यत्किंचिदिति ।** व्याप्यसंशयस्य साधारणान्तर्भावमते व्याप्यवारणाय यादृशयादृशेति वीप्सा । यत्किंचित्साध्यसंशयजनकतावच्छेदकीभूता या या स्वावच्छिन्नप्रतियोगिताकत्वविशिष्टसम्बन्धावच्छिन्नप्रकारतावच्छेदकता तदवच्छेदकतापर्याप्त्यधिकरणधर्मवद्धेतुतावच्छेदकवत्वमिति फलितार्थः । फलीभूतसंशयधर्मितावच्छेदकावच्छिन्नविशेष्यताकत्वं पूर्वोक्तं प्रकारतायामुपदेयम् । तेनेन्धनसामानाधिकरण्यावच्छेदकपटत्वावच्छिन्नवान् धूमवान् न वेत्यादिसंशयं प्रति तादृशघटत्वावच्छिन्नवानिति ज्ञानस्य हेतुत्वेऽपि नाप्रसङ्गः ।

अथवा वह्निसाहचर्यावच्छेदकधूमत्वावच्छिन्नवानिति ज्ञानस्य वह्न्यभाववद्वृत्तितानवच्छेदकधूमत्वावच्छिन्नवानिति ज्ञानस्य च संशयजनकत्वादतिव्याप्तिरतः साध्यसंशयजनकतावच्छेदकीभूता या प्रकारता या च तदवच्छिन्नसहकारितावच्छेदकीभूता प्रकारितावच्छेदकता तदुभयपर्याप्त्यधिकरणधर्मवत्वं हेतुतावच्छेदके निवेश्यं यत्किंचित्वाघटितं लक्षणं पूर्वमेव हेतुतावच्छेदकस्य यादृशयादृशधर्मशून्यत्वेन व्याप्यसंशयेत्यादियत्किंचित्वत्यागस्य स्वहस्तितत्वात् । विशिष्टवैशिष्ट्यावगाहितानिवेशे प्रयोजनमाह—**यत्रेति ।**

**अजनकत्वादिति ।** तथा च तत्र द्रव्यत्वाभावसाहचर्यघटकाधिकरणांशे तादृशधर्मविशिष्टहेतुतावच्छेदकीभूतविशिष्टसत्तात्वविशिष्टाधिकरणत्वाभावेन तादृशसत्तात्वविशिष्टवैशिष्ट्यावगाहित्वाभावान्नातिव्याप्तिरिति भावः । ननु तर्हि साधारणे कीदृशज्ञानमादाय लक्षणसमन्वयः कुतश्च सहचरितवृत्तित्वस्य प्रकारतावच्छेदकांशे भाने तद्विशिष्टवैशिष्ट्यावगाहित्वं नेत्यत आह—**उभयेति ।** **हेतुतया संशयकारण-**



तया । तथाचोभयवद्वृत्तितावच्छेकत्वमुभयत्वविशिष्टाधिकरणतानिरूपकतावच्छेदकत्वम् । तत्र च तादृशाधिकरणताभानात् तादृशावच्छेदकत्वावच्छिन्नावच्छेदकताकाधिकरणतायाः सम्बन्धत्वं भवति इत्यर्थः । एवं तादृशाधिकरणतानिरूपकतानवच्छेदकत्वविशिष्टधर्मावच्छिन्नाधिकरणतासंसर्गकज्ञानमस्तीत्याह—**उभयवद्वृत्तितानवच्छेदकेति ।**

अथ शब्दोऽनित्यः शब्दत्वादित्यादौ निश्चयघटितासाधारण्यावच्छेदकत्वविशिष्टशब्दत्वावच्छिन्नवत्ताज्ञानमादाय लक्षणासङ्गतावपि गगनादिरूपासाधारणेऽव्याप्तिः । गगनत्वावच्छिन्नाधिकरणताया अप्रसिद्धेरिति चेन्न, स्वावच्छिन्नप्रतियोगिताकत्वावच्छिन्नसंसर्गतानिरूपितप्रकारताया एव निवेश्यत्वात् । तादृशप्रतियोगिताकत्वं च गगनतादात्म्यादौ प्रसिद्धम् । यद्वा भ्रमस्थले अवच्छिन्नप्रतियोगिताकत्वविशिष्टसंसर्गकत्वं विशिष्टवैशिष्ट्यबुद्धेरुपगम्यते । लक्षणमपि स्वांशं विहायैव परिष्करणीयम् । एवञ्च संसर्गतावच्छेदकांशे प्रमात्वस्याप्रामाणिकत्वेपि न क्षतिः ।

केचित्—विशिष्टसत्वहेतुके वैशिष्ट्यं सामानाधिकरण्यं तच्च विशेषणं, अन्यथा व्यभिचारित्वापत्तेः । यां कांचिदनुमितिव्यक्तिमादाय तद्व्यक्तिसमवेतजातिमत्वरूपानुमितिव्यक्तिमादाय तद्व्यक्तिसमवेतजातिमत्वरूपानुमितिलक्षणे तद्व्यक्तिसमवेतत्वमुपलक्षणं, अन्यथा व्यक्त्यन्तरेऽव्याप्तेः । विशेषणत्वे विशिष्टनिरूपितसमवायादिः हेतुतावच्छेदकसंबन्धः । अन्यथा यद्धर्मविशिष्टनिरूपितत्वानवच्छिन्नसमवायादिः, तथा तस्यैव हेतुप्रकारस्योपलक्षणतया हेतुतावच्छेदकतेति तस्य विशेषणत्वानुपपत्तेः । नचैवं विशिष्टनिरूपितसमवायादिना शुद्धसत्तादेरव्यभिचारितया तद्विशेषणवैयर्थ्यात् गुणकर्मान्यत्वे सति सत्त्वादिति प्रयोगे निग्रहापत्तिरिति वाच्यम् । विशिष्टविशेषणकबुद्धावेव विशिष्टनिरूपितत्वस्य संबन्धतावच्छेदकत्वात् तद्रूपावच्छिन्नस्य तादृशसंबन्धेन हेतुत्वासंभवात् । एवं च येन संबन्धेन पक्षधर्मताज्ञानं तेन संबन्धेन कोटिद्वयसहचारावगाहितया संशायकत्वात् तादृशविशिष्टसंबन्धेन द्रव्यत्वाद्यभावसाहचर्यसिद्धेर्न द्रव्यं विशिष्टसत्वादित्यादौ वृत्तिः इत्याहुः ।

**तन्निवेशे चेति ।** ननु पक्षधर्मतापदोपादानेन पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितविषयतालाभेऽपि सविषयकत्वप्रकारकज्ञानं सविषयकं ज्ञानत्वादित्यादौ सविषयकत्वज्ञानधर्मिकसविषयकत्वप्रकारकज्ञानं प्रमात्वभ्रमत्वसहचरितज्ञानत्ववदिति

ज्ञानात् तादृशज्ञानं प्रमा न वेति संशयः, तत्र तादृशज्ञानत्वज्ञानस्यापि निरुक्तपक्षधर्मताज्ञानतयाऽतिव्याप्तिः । पक्षतावच्छेदकपर्याप्तधर्मितावच्छेदकताकविषयतानिवेशेऽपि अतिव्याप्तिरेव । यतः सविषयकत्वज्ञानं सविषयकमित्यर्थनिश्चयोत्तरे सविषयकत्वज्ञानं सविषयकं न वेत्यर्थसंशये सविषयकत्वज्ञानं प्रमा न वेति संशयोऽपि हेतुः । तत्र च सविषयकत्वज्ञानधर्मिकत्वाभानेन साधारणधर्मवत्ताज्ञानेऽपि तदभावादिति ।

मैवम् । पक्षतावच्छेदकीभूतात् सविषयकत्वप्रकारकत्वात् साध्यीभूतसविषयकत्वप्रकारकत्वस्य तादृशज्ञानत्वधर्मितावच्छेदकस्यान्यत्वात् । एवं विषयितात्वेन साध्यत्वेऽपि प्रमात्वसंशयौपयिकतादृशज्ञानवत्ताज्ञानस्य यादृशप्रकारित्वावच्छिन्नधर्मिव्यभिचारित्वावगाहित्वं तादृशप्रकारितायाः पक्षतानवच्छेदकत्वात् पक्षतावच्छेदकव्यक्तिनिष्ठत्वस्यावच्छेदकतायां निवेशान्नातिव्याप्तिरिति ।

**वस्तुतस्तु** यथाश्रुतलक्षणमालंब्यार्थसंशये तादृशप्रमात्वसंशयस्य हेतुतानिराकरणपर एवायं ग्रन्थः । अन्यथा साधारण्यादिविशिष्टधर्मवत्ताज्ञानाधीनकोटिमुख्यविशेष्यकावच्छिन्नत्वस्य संशयजनकतावच्छेदकत्वविवक्षायाः पूर्वोक्तयुक्त्या आवश्यकतया स्वमते अगतेः । एवं चैतादृशदोषवारकतयैव पक्षधर्मतापदोपादानमावश्यकमिति न शङ्क्यमित्यर्थः ।

**स्वरूपसंबन्धेति** । विषयितात्वं चातिरिक्तं नास्तीति हृदयम् । **प्रागेवेति** । **केचित्तु** साध्यतदभावोभयव्यापकतावच्छेदकैकप्रकारता नास्तीति अनायत्या इयं व्यक्तिः धर्मिणीति लक्षणाभिप्रायिकेति कोटिद्वयोपस्थापकत्वघटितलक्षणे **मिश्रोक्त**पदप्रयोजनखण्डनग्रन्थेन व्यवधानात् सन्दर्भाशुद्धिमाहुः । **अन्ये तु** स्वोक्तपक्षधर्मतापदोपादानप्रयोजनव्यवधानेन **मिश्रोक्त**तन्निराकरणतामाहुः । व्याप्यसंशयनिष्ठजनकतायाः अन्यांशे निश्चयनिष्ठत्वादाह — **तादृशेति** ।

लाघवादाह — **संशयत्वेति** । हेतुत्वाभिमतत्वं हेतुत्वशून्यत्वम् । न च तादृशजनकतावच्छेदकप्रकारताशालित्वे सति हेतुत्वाभिमतत्वमेवास्तु, तावतापि व्याप्यवारणादिति किं तादृशप्रकारतावच्छेदकधर्मवत्त्वं निवेश्यानर्थक्याभिधानेनेति वाच्यम् । तथा सति विरुद्धेऽतिव्याप्तेः । तदलक्ष्यतायाश्च विरुद्धत्वमेवेति **मणि**संमतत्वात् । अत एव **दीधितिकारे**णापि व्याप्यविरुद्धयोरतिप्रसङ्ग आशङ्कितः । आत्मत्वसाधकज्ञानादौ समवायेन सव्यभिचारव्यवहाराभावात् ।



**तेन सम्बन्धेनेति** । तथा च यथा ज्ञानं आत्मत्वे साध्ये विषयितासंबन्धेन सव्यभिचारीत्यादौ व्यभिचारव्यवहारस्य संदेहजनकतावच्छेदकधर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकारतावच्छेदकतापर्याप्त्यधिकरणो यः स शब्दस्याश्रयः । आत्मत्वपदोत्तरसप्तम्याः प्रकारताऽर्थः । तथाचात्मत्वसंदेहजनकतावच्छेदकज्ञानवृत्तिविषयितासंबन्धावच्छिन्नप्रकारतावच्छेदकधर्माश्रयं ज्ञानमिति व्यवहारार्थः । तथैवात्मत्वे साध्ये समवायेन सव्यभिचार इत्यत्रात्मत्वसन्देहजनकतावच्छेदकसमवायावच्छिन्नतादृशप्रकारतावच्छेदकधर्मवदभिन्नं ज्ञानमिति प्रतीयते नतादृशधर्मश्चाप्रसिद्ध इति भावः ।

ननु शब्दो अनित्यो नित्यो वा विप्रतिपत्तेरिति तादात्म्येन व्याप्ये विरुद्धे वाऽतिव्याप्तिः विप्रतिपत्तेः कोटिद्वयासहचरितत्वेऽपि तद्विषयकश्रावणप्रत्यक्षस्य कोटिद्वयोपस्थितिद्वारा साध्यसन्देहजनकत्वात् इत्याशङ्कावाराणय विप्रतिपत्तिस्त्वित मूलम् । कस्यचित् तादृशवाक्यप्रकारकज्ञानस्य जनकत्वादाह-**तादृशेति** । तथाच प्रकारतात्वेन जनकता नास्तीति भावः । पक्षधर्मतापदोपादानस्यास्तु बीजान्तरं न त्विदमित्याशयवानाह — **पक्षधर्मतापदानुपादानेऽपीति** । विषयभेदेन विषयताभेदादित्युक्तत्वादाह — **प्रत्येकमिति** । शब्दपदस्य शब्दोऽनित्यः शब्दत्वं च प्रतिपाद्यम् । एव पदान्तरस्यापि लक्षणादिना नित्यानित्यं प्रतिपाद्यम् ॥

**साधारण**मिति मूलं लक्षणसङ्गमनपरम् । **अन्वयेन** साध्यतदभावसाहचर्यविशिष्टः **व्यतिरेकेण** साध्यतदभावव्यावृत्तत्वविशिष्टः ॥ अन्यत्र सबन्धांशे निश्चयत्वस्य स्मृत्युपयोगित्वेऽप्यत्र तदकिंचित्करत्वमित्युक्तौ त्वाह गा-**एवमिति** । अप्रामाण्यं साहचर्याभाववति साहचर्यप्रकारकत्वं तदभावाप्रकारकत्वं तन्निश्चयः उक्ताप्रामाण्यज्ञानाभावविशिष्टः साहचर्याभावाप्रकारकसाहचर्यप्रकारकग्रहः साहचर्यनिश्चयः । अप्रामाण्यनिश्चयाभावस्य स्वतन्त्रकारणत्वोपगमात् साहचर्यज्ञानकारणतायां लाघवमेवेत्यत आह — **एवमिति** । रक्तारक्तदण्डवानितिवत् साहचर्यतदभाववत्प्रमेयत्ववत्सर्वमिति संशयस्यानुपगमः आद्यर्थः । संशयव्यवृत्तविलक्षणविषयतायाः कारणतावच्छेदकत्वात् न तन्निश्चयत्वप्रवेशगौरवमित्यादिपदार्थ इति केचित् ।

**दीधितौ** —साध्याभावाप्रसिद्धचेति । साध्यकोटिकसंदेह एव लक्षणघटकः । नतु साध्यं पक्षवृत्ति नवेत्यादिः साध्यसाहचर्याद्यवच्छिन्नहेतुज्ञानादेः तदजनकत्वात् ।

साध्याभावत्वेन भ्रमश्च न सार्वत्रिकः । एवमपि तथाविधसाहचर्यात्मकरूपाप्रसिद्धिश्च इति भावः । असाधारण्यस्यानित्यदोषतावादिमतं दर्शयति - **एवमिति** ॥

(गादा) **पक्षतादशायामिति ।** हेतुमति साध्यतदभावान्यतरनिश्चयविशेषविरहदशायामपि बोध्या । **तत्रेति ।** पक्षताविरहदशायामिति शेषः । **निश्चितेति ।** एतेन सपक्षविपक्षव्यावृत्तत्वप्रमादशायां लक्ष्यत्वेपि तदसत्वदशायामलक्ष्यत्वरूपसमाधानमप्युपपत्स्यते । तद्वद्भिन्नोऽयमिति ज्ञानस्य साध्यवत्तानिश्चयरूपतया तद्दशायां सद्धेतुत्वस्य तद्वाद्यनुमतत्वात् । **संपादयतीति ।** संशयजनकज्ञाने लक्ष्यत्वं संभावयितुं संपादयन्नित्यादिः । **साध्येति ।** सपक्षवृत्तित्वनिश्चयस्य तद्व्यावृत्तत्वज्ञानप्रतिबन्धकत्वात् । एवमग्रिमविपक्षवृत्तित्वनिश्चयस्यापि तथात्वं बोध्यम् । **इदन्त्वस्येति ।** तद्धर्मे तद्व्यावृत्तत्वज्ञाने तद्धर्मवति तद्भेदग्रहस्य हेतुत्वात् ।

मूले—**सद्धेतुरेवेत्येवकारः** एतल्लक्षणलक्ष्यताव्यवच्छेदार्थः । नन्वेवं व्याप्त्यादिमद्धेतुत्वस्य कुतो न ज्ञानं ? एवं तदानीं दुष्टव्यवहारस्याप्यनुपपत्तिरित्यत आह —**तदज्ञानमिति ।** तत्र तादृशधर्मिव्यावृत्तत्वज्ञानरूपप्रतिबन्धकवशान्न सद्धेतुत्वज्ञानमिति तदज्ञानं हेतुदोषः अयं तु न तथा किंतु कारणाभावः पुरुषनिष्ठः परिभाषया दोषपदव्यवहार्य इत्यर्थः । तथाच तत्र दुष्टताव्यवहारोऽलीक एवेति भावः । यद्वा नन्वेवं अनुपसंहारित्वस्यासाधारण्यस्य च अज्ञानदशायां तत्सत्वात्तदुत्पत्त्यापत्तिः अत आह-**तदज्ञानमिति ।** अनिश्चितदोषवत्वज्ञानेन च सद्धेतुत्वाज्ञानं पुरुषनिष्ठदोषोऽनुमित्यनुत्पादप्रयोजकः । तदुभयसहचारितया निश्चितसाध्यवत्त्वेनानुत्पादप्रयोजक इत्यर्थः । दुष्टताव्यवहार औपचारिक इति भावः । नन्वेतादृशस्थलेऽसाधारण्यं हेतुदोषः कुतो नास्तीत्याशङ्कायां दोषस्यैवासत्वात् स नास्तीत्यभिप्रायकोऽयं ग्रन्थः । अत एवेत्यतःपूर्वं तदधीनं च तद्दोषत्वमिति पूरणीयं; तद्बीजमाह (गा)**अतएवेत्यादिना । अनुपष्टकत्वादिति ।** सद्धेतुत्वाज्ञानरूपदोषस्य पुरुषावृत्तित्वेऽसाधारण्यस्यानित्यदोषतोपपत्तेः सद्धेतुत्वज्ञानदशायामदुष्टत्वेऽपि संशयदशायां दुष्टत्वादिति भावः ॥ दोषपदं सद्धेतुत्वाज्ञानरूपप्रक्रान्तदोषपरम् । साध्याद्यनिश्चयादिपर्यवसितम् । सजातीयदोषान्तरं च भ्रमः । तदुभयपरतया व्याचष्टे—**पुरुषस्येति ।** हेतुमति पक्षे चेत्यनयोः क्रमेण निश्चयभ्रमयोरन्वयः दुष्टत्वस्यैव तदधीनतया बहुव्रीहिं व्याचष्टे—**तादृशेति ।**

**एतच्च पूरणम्** । तथा च साध्याद्यनिश्चयादि पुरुषवृत्ति यदातदा असाधारण्यस्य सत्प्रतिपक्षितत्वस्य च हेतोरसाधारण्यादिमत्वामित्यर्थः । मूलेऽ**साधारण**-



पदं असाधारण्यपरम् । सत्प्रतिपक्षो दृष्टान्तः तदनुरोधेन भ्रमाभिधानम् । मूलदीधित्योरनित्यदोषत्वम् । तृतीयार्थबहुव्रीहिगर्भम् । अनित्यत्वं दशाविशेषावच्छिन्नत्वं दोषो दुष्टता सा चेदानीमयं दुष्ट इति व्यवहारः । हेतोरिति पूरणम् । एवमग्रेपि । तथा च हेतुमद्विशेष्यकसाध्याद्यनिश्चयाधीनत्वादेवासाधारण्यात्मकदोषस्य तादृशनिश्चयदशावच्छिन्नहेतुनिष्ठदुष्टतासंपादकत्वं साध्याभावव्याप्यवत्ताभ्रमाधीनसत्प्रतिपक्षात्मकदोषवत्वादेव तदुभयदशावच्छिन्नहेतुनिष्ठदुष्टतासंपादकत्वं अर्थः । सत्प्रतिपक्षश्च विरोधिसामग्रीकालीनत्वादिः ।

अत्र तर्कमाह—**साहजिकेति ।** साहजिकः स्वाभाविकः स्वाभावव्यधिकरणो वा दोषो येनेति विग्रहमभिप्रेत्याह—**तादृशेति । कदाचिदेवेति** दुष्टतान्वयि । कालविशेषावच्छिन्नस्वाभाववद्वृत्तिदुष्टतासंपादकत्वमर्थः। तादृशपुरुषदोषतद्विरहदशयोः असाधारण्यस्य दुष्टतासंपादकत्वस्यानिष्टत्वादिति भावः ।

**दशाविशेषे**—तद्धटभिन्नत्वभ्रमदशायाम् । अस्यैव च हेतुमति साध्यवत्तानिश्चयरूपत्वं, **दोषतां** प्रकृतानुमितितत्करणान्यतरप्रतिबन्धकतां, अनित्यदोषत्वं पूर्ववदर्थः एतेन तद्धटभिन्नत्वभ्रमोऽयमिति भ्रमासत्वे धर्म्यन्तरे घटत्वनिश्चयसत्वे तद्विषयधर्मिव्यावृत्तत्वरूपासाधारण्यस्य तत्कालावच्छिन्नदुष्टतासंपादकत्वरूपं अनित्यदोषत्वं निर्व्यूढमिति सूचितम् । **तत्रैवेति** प्रकृते पुरुषदोषाधीनदुष्टत्वशङ्काया निवृत्त्यर्थमेवकारः । भ्रममादाय तच्छङ्कावारणाय तत्कालीनसाध्यवत्तानिश्चयविषयधर्मिव्यावृत्तत्वज्ञानविषयत्वस्य निरुक्तानित्यदोषत्वं दीधितिकृन्निराचकार । **यत्रत्वित्यादिना** अग्रे मणिकृता प्रकृतमव्याप्तिनिराकरणम् पक्षमात्रवृत्तितयेति दीधितावभेदे तृतीया । **विरुद्धमेवेति ।** अयं घटः एतत्वादिति विरुद्धमपि द्रष्टव्यम् । **इतरानधीनेति** असाधारण्येतरस्वरूपासिद्ध्यप्रयोज्येत्यर्थः ।

(दी)**तुल्यन्यायतयेति ।** असाधारण्यं चेत् संशयप्रयोजकं निश्चयघटितं तदा साधारण्यमपि तादृशं निश्चयघटितमेव स्यात् तथाविधसाधारण्यादपि संशयस्वीकारसंभवात् । इष्टापत्तौ दोषमाह— **सद्धेताविति । मानाभावादिति ।** निश्चयघटितसाधारण्यज्ञानस्थले धर्मिणि साध्यतदभावासत्वे संदेहानुपगम एव वास्तवसाध्याभाववत्तानिवेशबीजं तदभावादित्यर्थः । एतद्दूषण(ज्ञान)[दान]एव भट्टाचार्याणां निर्भरः । अत एव अभिहितं चेत्यादिसिद्धान्तग्रन्थः संगच्छते । न हि निश्चयाघटितसाधारण्यतद्धटितासाधारण्ययोः संशयप्रयोजकत्वे कस्याप्यनुभव इति ।

(गादा)**विशेषणतया** व्यवहारपूर्वकालावच्छेदेन धर्मिवृत्तित्वेन । **तत्कालान्तर्भावेणेति ।** वह्नौ साध्ये इदानीं रासभो न सव्यभिचार इति व्यवहारापत्तिरित्यर्थः । मतान्तरमुत्थापयति—**विशेषणत्वे इति** । **अत्यन्तायोगव्यवच्छेदः** यदा कदाचित् तद्वत्त्वं स्वयं वक्ष्यमाणो वा । **तत्परिचायकतया** तज्ज्ञानसंपादकतया; तृतीयार्थः प्रयोज्यत्वं तस्य प्रतिपाद्यत्वशब्दार्थे प्रतिपत्तिविषयत्वेऽन्वयः । किंचेत्यादिदूषणमुद्धरति—**इदं पुनरिति** ॥ संशयजनकतावच्छेदकप्रकारतावच्छेदकरूपत्वेन व्यभिचारपदार्थतायां उपलक्षणत्वेऽतिऽव्याप्तेः दीधितावभिधानेन विशेषणत्वे सा नास्तीति गम्यते । प्रथमतःतन्निराकरोति—**शब्द इति** ।

**यद्घटेति** । न च व्यवहारकालावच्छिन्नसाध्यादिमत्तानिश्चयविशिष्टधर्मिव्यावृत्तत्वं विशिष्टमेव च संशयप्रयोजकं; तच्च तदभावदशायां नास्तीति **कथमेतदिति** वाच्यम् । तादृशरूपत्वेन व्यभिचारपदार्थत्वनिश्चयादेरप्रवेशात् व्यभिचारपदादीदृशरूपत्वेन न बोधः । किंतु क्रमान्तरेणेत्येतद्दोषमुद्धर्तुं शंकते—**अथेति । तथात्वेन** सन्देहजनकतावच्छेदकप्रकारतावच्छेदकत्वेन—**अविरोध इति ।** साधारण्यस्य विशेषणत्वे महानसादिवृत्तितादशायां रासभादावव्याप्तिः असाधारण्यस्योपलक्षणत्वे तदुत्तीर्णतादशायां अतिव्याप्तिश्च नेत्यर्थः । निश्चयाघटितरूपावच्छिन्नवाक्यस्थले कालविशेषो नान्वेत्येव साधारण्यस्य नित्यदोषत्वादत आह—**निश्चयेति** ।

कालान्तर्भावेणैव शक्तेः असाधारणे चायमिदानीं व्यभिचारीति व्यवहार एव न त्वयं व्यभिचारीति बोध्यम् ॥ ननु साध्यतदभाववद्वृत्तित्वसामान्याभावपरवाक्ये कथं कालविशेषस्य निश्चयांशेऽन्वयः उपलक्षणतया तदसंभवात् विशेषणतया तदन्वये तु तादृशप्रतियोगिताकाभावस्य व्यभिचारपदशक्यत्वापातादतः खण्डशक्तिमङ्गीकृत्य तथाविधविशेषाभावलाभमाह—**साध्येति** । तथाचासाधारण्योत्तीर्णतादशायां इदानीं अयं सव्यभिचार इति व्यवहारस्य नापत्तिः । तत्कालावच्छिन्नसाध्यादिमत्तानिश्चयमविषयीकृत्य घटगगनादिव्यावृत्तत्वमात्रस्य तद्व्यवहारागोचरत्वादिति भावः ।

व्यभिचारादिपदस्य साधारण्यासाधारण्यादिरूपनानार्थत्वमिष्टमेवेति **पाठः** तदासाधारण्यस्य विशेषणतया कालान्तरे इदानीं सव्यभिचार इति तत्पदव्यवहारवारणे । **उपलक्षणत्वेपीति** विभाजकरूपस्येत्यादिः । **उक्तदोषावसरः** असाधारण्योत्तीर्णतादशायां तदतिव्याप्त्यवसरः । विभाजकस्याव्यवहर्तव्यत्वादिति भावः ।



**संशयेति** । एतमन्ते व्यभिचारपदस्य न नानार्थतेति बोध्यम् । नन्वयं घट एतत्त्वात् अनित्यःशब्दत्वादित्यादौ घटत्वतदभाववद्व्यावृत्तहेतुमानिति ज्ञानसत्वेऽनुमितिर्न जायत इति भ्रमविषयस्य तादृशव्यावृत्तत्वस्य दोषत्वमनपवादमित्यत आह—**नव्यमत इति** ।

**व्याचष्ट इति । अनित्यं** विशेषदर्शनदशायामसंभवात् । **दोषत्वमनुमित्यनुत्पादप्रयोजकत्वं** यस्य स तथेति विग्रहमुपगम्येत्यादिः । विशेषदर्शनं च पक्षे साध्यादिमत्तानिश्चयः धर्मे घटवृत्तित्वादिनिश्चयश्च । तत्राद्यं घटवृत्तिधर्मवत्ताज्ञानीयप्रकारतायां घटनिष्ठविशेष्यतानिरूपकत्वरूपाप्रामाण्यग्राहकसद्धेतोरिति । **सद्धेताविति** मूलं अलक्ष्यत्वपरं अलक्ष्यत्वं च दुष्टत्वं तदज्ञानं दोष इति च सद्धेतुत्वज्ञानस्य हेतुदोषतानिराकरणपरम् । तथा च तस्य सर्वदा दुष्टत्वस्य न मूलानुक्तत्वम् । **तथा** दोषवत्त्वाभाववान् —**अनुमित्यनुत्पादेति** । संशयान्यतद्वत्ताज्ञानं प्रति विपरीतकोटिमद्व्यावृत्तत्वावच्छिन्नप्रकारकज्ञानमनुत्तेजकीकृत्यैव तत्कोटिमद्व्यावृत्तत्वावच्छिन्नप्रकारकज्ञानस्य प्रतिबन्धकत्वात् । एवं प्रकरणसमस्थलेऽप्यूह्यम् । अत्रापि तत्साध्यबाधावतारे प्रामाण्यज्ञानासंज्ञनादनुमितिर्भवतीति विशेषादर्शनदशायामिति योजनीयम् ।

**पक्षतेति** । अभेदस्य साध्यत्वे आहार्या, तद्व्यक्तित्वरूपतत्साधने त्वनाहार्या, तेनाहार्यसंशयानुपगमेऽपि न क्षतिरिति केचित् । **सद्धेताविति** । वह्नितदभावसमानाधिकरणधूमवानिति भ्रममादायेति शेषः । **तत्र** सद्धेतौ **तादृशज्ञानं** पक्षधर्मताज्ञानम् । **न विभाजकत्वेति ।** विभाजकस्य विरोधितावच्छेदकस्य चैक्यादिति भावः । **एवं चेति** एवंचोद्भावनादिति मूलस्य निरुक्तविभाजकतावच्छेदकावच्छिन्नानुद्भावनेपि साधारण्यादिरूपप्रत्येकधर्मावच्छिन्नस्योद्भावनादित्यर्थो ध्वनितः ।

नन्वेतदज्ञानेऽपीत्यादिना प्रत्येकज्ञानस्य प्रतिबन्धकतालाभेऽपि तत्प्रयुक्तमनुगतधर्मज्ञानस्यानुमित्यविरोधित्वं न लभ्यत इति अनुगतधर्मस्य विभाजकत्वं दुर्वारमित्यत आह—**मूल इति** । शेषं विनैव तल्लाभं वदतां मतमाह—**तस्यैवेति ।** एवकारेण अनुगतधर्मज्ञानस्य विरोधिताव्यवच्छेदः । तत्र दर्शितप्रतिबन्धकताप्रयुक्तत्वलाभार्थमाह—**तत्रैवेति ।** एवकारश्च खण्डनहेतुताव्यवच्छेदार्थः । **अयं** प्रतिबन्धादित्यन्तः । दोषत्वाच्चेति चकारस्त्याज्य इत्यभिमानः । अत्याज्यत्वसंभवे चकारस्य त्यागोऽनुचित इत्याशयेन दूषयति—**दोषत्वाच्चेति ।** यत्र नैतदुद्भाव्यते किंतु प्रत्येकधर्म एव तत्रास्तां तथैव; यत्र तु एतदेवोद्भाव्यते तत्रानायत्या अनुमितिप्रतिबन्धः

एतदुद्भावनादेव वाच्य इत्याशङ्कयोद्भावितैतन्निर्वाहार्थमित्यादिमूलम् **।** एतदुद्भावनस्थलेऽनुमितिप्रतिबन्धरूपफलनिर्वाहानुरोधेन । किं तद्रूपमित्याकाङ्क्षानिवृत्तये च प्रत्येकधर्मोद्भावनमावश्यकमित्यनुगतधर्मस्योद्भावनायोग्यत्वपरम् ॥ यादृशनियमान्तरमङ्गीकृत्येदं दूषणं तमाह—**एवं चेति ।**

अत्र च प्रत्येकज्ञानप्रतिबन्धकताप्रयुक्तमेवानुगतधर्मज्ञानस्याप्रतिबन्धकत्व मूललभ्यमिति दीधितिकृद्भिः वस्तुतस्त्वित्यादिना अनुगतधर्मज्ञानाप्रतिबन्धकत्वे बीजान्तरं तदनुसारेण स्वयं मूलस्थद्वितीयदूषणस्य नियमान्तराभिप्रायकत्वं चोक्तम्। परंतु एतत्सर्वं मणिकाराभिप्रायानवबोधमूलकमिति स्वयं मूलं योजयितुमुपक्रमते—**इदं त्विति ।** प्रतिबन्धादित्यन्तमूलेन विरोधिविषयकत्वात्मकस्य प्रतिबन्धकताबीजस्य प्रदर्शनात् विरोध्यविषयकनिरुक्तधर्मज्ञानस्य मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वं निराकर्तुं पूरयति–**मानाभावेनेति ।** एवं च वस्तुतस्त्वित्यादिदीधितिकृत्समारम्भो वृथैवेति व्यञ्जितम्। दोषविधया प्रत्येकधर्मोद्भावनस्य सामान्यधर्मानुद्भावनीयतासंपादकत्वमपि मूलाभिप्रेतमिति व्यञ्जयति–**अनन्तरमित्यादिना ।** विरोध्यविषयकस्य प्रतिबन्धकत्वे युक्तिमाह — **विशेषदर्शिनामिति ।** व्यभिचारज्ञानवताम्। **दोषत्वादित्यन्तेनेति ।** दोषत्वादित्यस्यावश्यकविरोधित्वादित्यर्थान्न चकारासङ्गतिः। तथाच मूलस्यैव विरीधिताबीजविरोधिविषयकत्वाद्यभिप्रायकत्वात् प्रतिबन्धकज्ञानविषय एव दोषविधयोद्भाव्यः, स एव च विभाजक इति नियमयुगलाभिप्रायकत्वायासो व्यर्थ इति ध्वनितम्।

प्रत्येकज्ञानादुद्भावनाच्चेत्यनेनोद्भावनानधीनतदधीनज्ञाने उक्ते । यावद्विशेषोपादानं च सामान्यलाभार्थं, एतदज्ञानेऽपीति च प्रथमतो विरोधिविषयकत्वरूपतद्बीजानभिज्ञं प्रति व्युत्पादनं विरोध्यविरोधिविषयकज्ञानयोः अविरोधिविषयकमेव कुतो न प्रतिबन्धकमित्याशङ्कावारणाय। अनुमितीत्यस्य जनकज्ञानप्रतिबन्धद्वारेत्यादिः। मणिमन्त्रादिन्यायेन कुतो न प्रतिबन्धकमित्याशङ्कानिरासपरेण उद्भावितैतदिति मूलेन सामान्यधर्मोद्भावने दर्शितकथंतानिरासाय विशेषधर्मोद्भावनस्यावश्यकतया विरोधिविषयकं ज्ञानं संपद्यते। एवंच तत एव प्रतिबन्धसंभवात् मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वं नकल्प्यते। यत्र तु न विरोधिविषयकज्ञानं किन्तुसामान्यधर्मज्ञानमेव तत्र न प्रतिबन्ध इति सूचितम् ॥

**तादृशयुक्तेरिति । तद्व्याचष्टे इति ।** सत्यपि विरोधित्वान्ते दोषलक्षणे सूचीकटाहन्यायेन दुष्टलक्षणं प्रथमतो व्याख्यातमिति बोध्यम्। तत्कालावच्छिन्न-



साध्यादिमत्तानिश्चयविषयधर्मिव्यावृत्तत्वे साध्यवद्वृत्तित्वग्रहाविरोधितया विशेष्यदलासत्वादाह—**निश्चयागर्भितस्येति । बाधादीति ।** नच दुष्टा एव लक्ष्या ह्रदो वह्निमान् इत्यादौ धूमादेः न पक्षवृत्तित्वं मेयत्वादेश्च लक्ष्यतैवेति पक्षपदव्याख्यानवैयर्थ्यं हेतुमत्ताग्रहाविरोधित्वमात्रमुपादेयम्। तेन ह्रदो धूमवान् वह्नेरित्यादौ हेतोः पक्षावृत्तित्वेपि नाव्याप्तिरिति वाच्यम्। तथा सति बाधादेः सव्यभिचारपदार्थतावच्छेदकत्वाप्रसङ्गात्। अत एव तत्संबन्धः प्रत्येकमस्तीत्यादिना पृथक् दुष्टलक्षणसमन्वयो दर्शयिष्यते।

बहुव्रीहिं स्फुटयति—**संदिग्धेति ॥** बाधादेः साध्यविशिष्टधर्मिवृत्तित्वग्रहाविरोधित्वाद्याचष्टे—**पक्षतेति ।** व्यभिचारस्यापीत्यस्य बुद्धावप्यन्वयः। हेतुमन्निष्ठसाध्याभावत्वेन बुद्धेः पक्षे साध्यवत्ताग्रहाविरोधित्वाह—**पक्षनिष्ठसाध्याभावत्वादिनेति । तादृशेति ।** तादृशलौकिकसन्निकर्षाद्यजन्यज्ञानत्वव्यापकप्रतिबन्ध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतानवच्छेदकधर्मवत्त्वमर्थः ॥

अत्र पर्वतो धूमवान् वह्निमान् वह्निश्च धूमाभाववदवृत्तिरिति समूहालंबनप्रतिबन्धकतावच्छेदकविषयितानिरूपकतानवच्छेदकत्वासंभवात् असंभव इति व्यापकत्वनिवेशः। साध्यादिप्रकारकज्ञानत्वादिव्यापकताभङ्गप्रसङ्गवारणाय पक्षतावच्छेदकावच्छिन्नविशेष्यतासाध्यताहेतुतावच्छेदकावच्छिन्नप्रकारतातिवेशः। पक्षसाध्यसाधनाप्रसिद्धिवारणाय पर्यातिनिवेश ऊह्यः। मूलावच्छिन्नो वृक्षःकपिसंयोगी वृक्षत्वात् कपिसंयोगाभाववान् मूलावच्छिन्नवृक्षःइति बाधे अतिप्रसङ्गः। तज्ज्ञानेऽपि लौकिकसन्निकर्षेण साध्यवत्ताज्ञानोत्पादादिति लौकिकसन्निकर्षाजन्यत्वनिवेशः। आदिना दोषविशेषाजन्यत्वमुक्तम्। तन्निवेशात् पीतःशङ्खःशङ्खत्वादित्यादौ पीतत्वाभावविशिष्टशङ्खज्ञाने दोषविशेषेण पीतत्वविशिष्टशङ्खज्ञानोत्पादेऽपि नातिव्याप्तिः।

एवमनाहार्यत्वमपि निवेश्यम्। साध्याभावत्वे स्वरूपसंबन्धरूपप्रतिबन्धकतावच्छेदकत्वाश्रयविषयतावच्छेदकतापर्याप्तिसत्वे हेतुमद्वृत्तित्वविशिष्टेपि तत्र तदभावो दुर्घट इति अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशः। वह्न्यभावत्वावच्छिन्नप्रकारिताव्यक्तेः प्रतिबन्धकतानतिरिक्तवृत्तित्ववारणाय यादृशावच्छेदकताकविषयिताव्यापकता प्रतिबन्धकतायाः तादृशावच्छेदकतापर्याप्त्यनधिकरणत्वं विवक्षणीयम्

**अथानतिरिक्तवृत्तित्वनिवेशेपि** प्रमेयत्वमवृत्ति प्रमेयत्वादित्यादौ बाधघटितव्यभिचारेऽव्याप्तिः तत्र तादृशविषयितावच्छेदकतापर्याप्तेः बाधनिष्ठायाः अनधिकरणत्वासंभवात् । तादृशावच्छेदकतापर्याप्त्यधिकरणापर्याप्तविषयताश्रयत्वविवक्षापि न दोषवारणक्षमा, तादृशसमुदायपर्याप्तविषयताया बाधतावच्छेदकेऽपि पर्याप्तेः । एतेन विशेष्यदलघटकयद्रूपावच्छिन्नविषयतायास्तादृशप्रतिबन्धकतानवच्छेदकत्वं लघीय इत्यपास्तम् ॥ मैवम् ।

तादृशविषयितानिरूपकतावच्छेदकबाधत्वादिनिष्ठस्वपर्याप्तविषयतापर्याप्त्यनभिकरणताकत्वस्य वाच्यत्वात् । एवं च धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यादौ व्यभिचारेऽव्याप्तिः स्वरूपसंबन्धरूपतादृशप्रतिबन्धकतावच्छेदकतावद्विषयितानिरूपकतावच्छेदकव्यभिचारत्वादेः । स्वपर्याप्तविषयतापर्याप्त्यनधिकरणत्वासंभवात् । अतःतत्रानतिरिक्तवृत्तित्वनिवेशः । ईदृशार्थस्योदक्षरत्वे कल्पान्तरावतारः । अथ वा विशेष्यदलप्रविष्टप्रतिबन्धकतायास्तादृशप्रतिबन्धकतान्यत्वं विवक्षणीयम् । बाधादिनिष्ठानामिति ग्रन्थस्तु यथाश्रुताभिप्रायकः ।

ननु तादृशानवच्छेदकप्रमेयत्वादिमत्त्वे सति अनुमितिविरोधितावच्छेदकीभूत बाधत्वादेः सत्वाद्बाधादावतिव्याप्तिरित्यत आह — **बाधादीति । तादृशेति ।** तादृशज्ञानत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानवच्छेदकत्वविशिष्टयद्रूपावच्छिन्नविषयिताव्यापिका निरुक्तसमूहालंबनानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपावच्छिन्नेत्यर्थः । नचैवमव्यावृत्तिपदमिति लिखनासङ्गतिः, वह्निमान् रासभादित्यादौ महानसवृत्तितादशायां वह्न्यभावसाहचर्यासत्वेपि सर्वदा तद्विशिष्टरासभत्वसत्वादिति वाच्यम् । रासभवृत्तित्वविशिष्टवह्न्यभाववद्वृत्तित्वमादाय तादृरूप्येणाव्यभिचारिताव्यवहारसंपादनार्थत्वात् । वह्न्यभावसाहचर्यविशिष्टरासभत्वस्य तदुभयात्मकतया महानसादिवृत्तितादशायां तदभावसत्वाच्च । न च रासभवृत्तिवह्न्यभावसाहचर्यस्य वह्न्यभावसाहचर्यविशिष्टरासभत्वस्य वा स्वज्ञानविषयहेतुतावच्छेदकसंबन्धेन सत्वादव्यावृत्तिपदमनर्थकमिति वाच्यम् । अव्यावृत्तस्यैव दुष्टत्वं दोषलक्षण नास्त्येव । **अथ** वाऽनित्यहेतुतावच्छेदकानुरोधेन तादृशहेतुतावच्छेदकधर्माव्यावृत्तेःसंबन्धत्वमित्याशयात् ॥

पर्वतो धूमवान् वह्नेरित्यादौ साध्यहेतुविशिष्टपक्षग्रहविरोध्यप्रसिद्ध्याऽव्याप्तेराह—**तादृशमिति** । प्रकृतपक्षे प्रकृतसाध्यहेतुप्रकारकलौकिकसन्निकर्षाद्यजन्यज्ञानत्व



व्यापकतादृशप्रतिबध्यत्वनिवेशो दर्शितसमूहालंबनस्य तत्प्रतिबध्यत्वादसंभवोऽतो **यत्किञ्चिदिति ।**

निश्चयत्वं चानाहार्याप्रामाण्यज्ञानानास्कन्दितसंशयान्यज्ञानत्वम् । **प्रयोजन**मूह्यम् । यद्रूपावच्छिन्नविषयकनिश्चयत्वाव्यापकनिवर्तकतानिरूपितनिवर्त्यत्वाभावशरीरे व्यभिचारबाधसमूहालंबननिष्ठव्यभिचारविषयकनिश्चयत्वसमानाधिकरणप्रतिबन्धकतामादायासम्भववारणाय व्यापकतोपादानं, तद्विशेषणस्यानुपादानेऽपि धूमवान् वह्नेरित्यादौ क्षत्यभावात् तस्यैक्योक्तौ लघुविशेषणलाभार्थमाह—**वस्तुतस्त्विति** ॥

ननु धूमव्यभिचाराभाववान् वह्निःधूमवान् वह्नेरित्यादौ व्यभिचारेऽव्याप्तिः तस्य पक्षे साध्यादिमत्ताग्रहविरोधित्वात् । एवं वह्निसमानाधिकरणं गगनं वह्निमत् गगनादित्यादौ वह्न्यसमानाधिकरणगगनेऽपीत्यत आह—**अत्र चेति ॥ यथाश्रुतेति ।** यद्यपि तस्याव्यावृत्तिविशेषणत्वं तथापि तस्य विरोधिविशेषणत्वमुपगम्येदृशार्थोपवर्णनात्तन्निरास इत्यर्थः । साध्याभाववद्वृत्तीत्यादिहेतुघटितो बोध्यः । एवमग्रेपि । दोषलक्षणातिप्रसङ्गो न क्षतिकरः अप्रकृतत्वात् । दुष्टलक्षणे च नातिव्याप्तिरित्याशयेन शङ्कते—**नचेति । तस्य** विरोधस्य, **तत्पदस्य** सव्यभिचारपदस्य । इष्टापत्तौ त्वाह —**सव्यभिचारेति,** तस्य सव्यभिचारपदप्रवृत्तिनिमित्तत्वासंभवादित्यनुवर्तते । तथाच सव्यभिचारपदार्थानवच्छेदकीभूतविरोधमादायासाधारणेऽपि सव्यभिचारव्यवहारोऽनिष्ट एवेति भावः ।

**पक्षवृत्तित्वे सतीति** तज्ज्ञानविशिष्टस्य विरोधित्वलाभाय । साध्यवत्तव्यक्तिवृत्तित्वग्रहे निश्चितसाध्यवत्तद्व्यक्त्यवृत्तित्वग्रहस्य प्राञ्चैर्विरोधित्वमुपेयते । धर्म्यंशे निश्चयस्योपलक्षणतया निवेशाद्वा सामान्याभावलाभ इत्याशयेन **कथञ्चिदिति ।** विशिष्टवैशिष्ट्यावगाहित्वेन प्रतिबन्धकतान्तरे मानाभावप्रदर्शनाय स्थाणुत्वाभावेति दृष्टान्तः । **सत्यन्तार्थविरह इति ॥** नच सत्यन्तार्थेऽनतिरिक्तवृत्तित्वं निविष्टमिति कथमेतदिति वाच्यं; प्रतिबन्धकताशून्यपक्षधर्मताज्ञानकालीनज्ञानावृत्तित्वं अनतिरिक्तवृत्तित्वमिति यद्रूपावच्छिन्नविषयकनिश्चयसामान्याप्रतिबध्यमिति कल्पे साधारण्यनिश्चयसामान्यप्रतिबध्यो जलं वह्निव्यापकीभूताभावाप्रतियोगीति निश्चय एव, न तु साध्यादिमत्ताग्रह इति पक्षधर्मताज्ञानकालीननिश्चयप्रवेश एवेत्याशयात् ।

**वस्तुतस्तु** यत्र विषयविशेषेऽप्रतिबन्धकोऽसाधारण्यनिश्चयः तत्परम् । यद्वा पक्षे साध्यहेत्ववगाहितादृशग्रहत्वन्यूनवृत्तित्वमेवानुमितिविरोधित्वघटकानुमितिनिष्ठप्रतिबध्यताविशेषणमिति पक्षे इदमिति ज्यायः । पक्षावृत्यसाधारण्यासंग्रहोऽस्वरस **आहुरित्यनेन** सूचितः ।

पक्षवृतित्वाघटितासाधारण्यमुपेत्य परेतुमतं दूषयिष्यन् स्वमतप्रकारमाह— **वस्तुत इति** । पर्वतो जलवान् वह्न्यभावव्याप्यादित्यादौ वह्निमत्पर्वतस्य ह्रदो घटवान् वह्निव्याप्यधूमादित्यादौ ह्रदनिष्ठवह्न्यभाववत्त्वस्य वारणाय पक्षधर्मताविषयकत्वमुपेक्षितम् । हेतुव्यापकवह्न्यभावस्तु असाधारण इति बोध्यम् । अनुमितिप्रतिबन्धकताशून्यत्वं च पक्षधर्मताज्ञानस्य न विशेषणं, धूमवान् ह्रद इति ज्ञानानन्तरं ह्रदो धूमाभाववानिति लौकिकसन्निकर्षजन्यस्वरूपासिद्धिविषयकनिश्चये धूमाभाववद्ध्रदत्वावच्छिन्नविषयकनिश्चयत्वसत्वात् । एवं तादृशं यत् पक्षधर्मताज्ञानं तत्कालीनज्ञाने बाधादिविषयकत्वमपि बोध्यम् । किन्तु द्वितीयज्ञानस्य, पूर्वं यत्तुकारमतेऽप्रतिबन्धको निश्चयो निविष्टः इह तु ज्ञानमिति निश्चयत्वप्रवेशः । दोषैकदेशह्रदत्वाद्यवच्छिन्ननिश्चयत्वस्य प्रतिबन्धकतातिरिक्तवृत्तित्वात न तत्रातिव्याप्तिरितीहापि शेषः । निश्चयत्वस्य ज्ञानत्वानन्यतया नानतिरिक्तवृत्तित्वमिति उक्तदोषादाह—**अथवेति** ।

न च वह्निव्यापकीभूताभावप्रतियोगि जलमिति निश्चयसत्वे समूहालंबनानुमित्यनुत्पादाद्यथाश्रुतलक्षणेनासाधारण्यसंग्रहादुभयाभावादिघटितपरिष्कारो निर्बीज इति वाच्यम् । यतः पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानत्वावच्छिन्नं प्रत्येव कार्यकालवर्तितयापि पक्षधर्मिकहेतुमत्तानिश्चयविशिष्टहेतुधर्मिकसाध्यव्यापकीभूताभावप्रतियोगित्वप्रकारकनिश्चयत्वेन प्रतिबन्धकता न तु पक्षधर्मिकसाध्यहेतुवैशिष्ट्यावगाहिनिश्चयत्वेन । एवं च पक्षधर्मिकहेतुमत्ताज्ञानाविशिष्टासाधारण्यज्ञानस्य प्रतिबन्धकताशून्यत्वादसंग्रहः स्यादिति तादृशपरिष्कारः । न चैवमपि काञ्चनमयपर्वतो वह्निमान् धूमात् ह्रदः काञ्चनमयवह्निमान् गगनादित्यादौ काञ्चनमयत्वव्यापकीभूताभावप्रतियोगिधूमः गगनं वा धूमवान् पर्वतो गगनवान् ह्रद इति ज्ञानस्यापि ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकतया अतिव्याप्तिः । वह्न्यभावव्याप्यजलादिवारणाय प्रतिबन्धकतायां ज्ञानवैशिष्ट्यावच्छिन्नत्वअसाधारण्यविषयित्वानवच्छिन्नत्वोभयाभाववत्त्वस्य निवेश्यत्वात् ।



न चैवमपि घटो गगनाभाववदभाववत्कालीनगगनवान् घटत्वादित्यादौ तादृशगगनाभाववद्धटात्मकबाधेऽव्याप्तिः तन्निश्चयस्य घटत्वावच्छिन्ने गगनत्वावच्छिन्नप्रकारताशालिज्ञानं प्रति अभावावच्छेदेनगगनाभावनिश्चयविशिष्टघटत्वावच्छिन्नविशेष्यकाभाववत्तानिश्चयत्वेनैव विरोधितया ज्ञानवैशिष्ट्यानवच्छिन्नतादृशबाधविषयित्वावच्छिन्नप्रतिबन्धकतायां मानाभावाज्ज्ञानवैशिष्ट्यावच्छित्वासाधारण्यविषयकत्वानवच्छिन्नत्वोभयाभाववत्प्रधिबन्धकत्वाभावघटितोभयसत्वादिति वाच्यम् । तत्र शुद्धगगनाभाववत्पक्षरूपबाधस्यैव लक्ष्यत्वात् न तु तादृशबाधस्य । **यत्तु** तस्य लक्ष्यत्वे यद्रूपावच्छिन्ने यद्रूपावच्छिन्नाभावव्याप्यवत्तानिश्चयत्वव्यापकः तादृशोभयाभाववत्प्रतिबन्धकताशून्यत्वपक्षधर्मताज्ञानकालीनत्वोभयाभावः तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नाभावतद्व्याप्यान्यतरवत्त्वं निवेश्यम् । तादृशबाधे लक्षणसमन्वयः ।

न च पर्वते वह्निव्याप्याभावस्य साध्यत्वे वह्निमत्पर्वतेऽतिव्याप्तिः तन्निश्चये उभयाभावासत्वेपि वह्निव्याप्यवत्पर्वतनिश्चये उभयाभावसत्त्वादिति वाच्यं; व्याप्यवत्तानिर्णये यत्प्रतिबन्धकताप्रयुक्त उभयाभावः तत्प्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशून्यत्वेन तस्य विशेषणीयत्वात् । यत्प्रतिबन्धकतामादाय लक्षणं सङ्गमनीयं तत्परं यत्प्रतिबन्धकतापदं, प्रतिबध्यताशून्यत्वं च प्रतिबध्यतानवच्छेदकव्याप्तिविशिष्टवैशिष्ट्यावगाहिताश्रयत्वं तेन बाधघटितसत्प्रतिपक्षे तज्ज्ञानस्य प्रतिबध्यताशून्यत्वाभावेपि न क्षतिः । एवं च यद्धर्मावच्छेदेन यद्धर्मावच्छिन्नाभावव्याप्यवत्त्वं यत्र विरोधि तत्र तद्धर्मावच्छेदेन तादृशधर्मावच्छिन्नाभावो दोषः । यत्र यद्धर्मसामानाधिकरण्येन यद्धर्मावच्छिन्नाभावव्याप्यवत्त्वं विरोधि तत्र तद्धर्मसामानाधिकरण्येन तद्धर्मावच्छिन्नाभावो दोषः । तथा सति लक्षणभेद इष्ट एव, शब्दैक्यस्यानुपादेयत्वादिति ।

**तन्न** । अत्रासाधारण्येऽव्याप्तेः तद्वृत्यतिव्याप्तेश्चेति न किंचिदेतत् । न च गगनाभाववद्धटवत्कालीनभूतलं गगनवदित्यादौ गगनाभाववद्धटवत्कालीनघटवद्भूतलेऽतिव्याप्तिः, घटावच्छेदेन गगनाभावनिश्चयविशिष्टघटवद्गगनाभाववद्धटवत्कालीनभूतलविषयकनिश्चयत्वेन न प्रतिबन्धकत्वं किं तु लाघवात् तादृशभूतलत्वावच्छिन्नविशेष्यकघटवत्तानिश्चत्वेनैवेति ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतासत्वात इति वाच्यं; अगत्या तत्र तादृशप्रतिबन्धकताभेदं निवेश्यैवातिव्याप्तेर्वारणीयत्वात् । नचैवमपि ह्रदो वह्निमान् गगनवद्ध्रदकालीनगगनव्याप्यजलवद्वृत्तिजलादित्यादौ जलावच्छेदेन

गगनाभावेऽतिव्याप्तिः । पक्षधर्मिकहेतुमत्तानिश्चयकालीनस्य तन्निश्चयस्याहार्यतया तदकालीनस्य तन्निश्चयस्यैव घटतव्यतया तत्रोभयाभावस्याक्षतत्वादिति वाच्यं ; भाविहेतुमत्ताज्ञानधर्मिकाप्रामाण्यज्ञानाद्युत्तरं कथंचिदनाहार्यतन्निश्चयस्य पक्षे हेतुमत्तानिश्चयकालीनस्य संभवात् गगनाभाववदभाववत्कालीनगगनाभाववद्धटात्मकबाधस्य लक्ष्यत्वे तु विशिष्टान्तरविषयित्वाप्रयोज्यस्वविषयिताप्रयोज्येत्यादिविशिष्टान्तराघटितत्वशरीरे प्रतियोगिकोटौ तत्तद्धर्मभेदादि निवेश्य संग्रहः कार्यः ।

**अन्ये** तु ह्रदःकाञ्चनमयह्रदवान् गगनादित्यादौ काञ्चनमयत्वव्यापकीभूताभावप्रतियोगिगगनादेः सामान्यलक्षणाक्रान्तस्यासिद्धित्वमुपेयम् । एवं व्यभिचारलक्षणेऽसिद्धिभेद एव निवेश्यःन तूभयाभावघटकप्रतिबन्धकतायामुभयाभावः प्रयोजनाभावात् तथा च गगनाभाववदभाववत्कालीनगगनाभाववद्धटात्मकबाधो लक्ष्य एवेति प्राहुः ।

वस्तुतस्त्वसाधारण्यज्ञानाविशिष्टपक्षधर्मिकहेतुमत्तानिश्चयकालीनत्वमुभयाभावप्रतियोगिघटकं, तत्र हेतुमत्ताज्ञानेऽनाहार्यत्वं न निवेश्यं प्रयोजनाभावात् तेन प्रागुक्ते ह्रदो वह्निमान् गगनवद्ध्रदकालीनगगनव्याप्यजलवद्वृत्तिजलादित्यादौ जलावच्छेदेन गगनाभावादौ अनाहार्यपक्षधर्मिकहेतुमत्तानिश्चयकालीनतन्निश्चयाप्रतिबध्यग्रहत्वेपि नातिव्याप्तिः । एवं च यद्रूपावच्छिन्नविषयतायां प्रतिबन्धकता यद्विषयकत्वाव्यापिका तदन्यत्वावच्छेदकावच्छेदेन हेतुमत्ताज्ञानप्रतिबन्धकतावच्छेदकत्वैतदुभयाभावत्त्वविशेषणात् वह्निव्यापकीभूताभावप्रतियोगि जलं वह्निमज्जलादित्यादौ सामाधिकरण्येन साध्यसाधनभावे सामानाधिकरण्येन हेत्वभाववत्पक्षे नातिव्याप्तिः ।

अत्रैवासाधारण्येऽव्याप्तिः तादृशजलत्वावच्छिन्ने वह्निप्रकारकबुद्धिं प्रति लाघवेन तादृशजलत्वावच्छिन्नधर्मिकजलवत्तानिश्चयत्वेनैव विरोधितया असाधारण्यनिश्चये प्रतिबन्धकत्वस्यैवासत्वेनोभयाभावस्य सत्वादिति तु न वाच्यम् । तादृशनिश्चयस्यासाधारण्यविषयकत्वेन तद्विशिष्टपक्षधर्मिकहेतुमत्ताज्ञानकालीनत्वघटितोभयाभावसत्वात् । जलवत्तादृशजलेऽतिव्याप्तिस्तु कथंचित् प्रतिबन्धकनाभेदादिकं निवेश्य वारणीयेत्यलमनल्पजल्पेन ।

नन्वेवमपि ह्रदत्वसामानाधिकरण्येन वह्नेःसाध्यत्वेऽसाधारण्यज्ञानविशिष्टं तदवच्छेदेन हेतुमत्ताज्ञानं प्रतिबन्धकं, तदवच्छेन वह्नेःसाध्यत्वे च तज्ज्ञानविशिष्टं



तत्सामानाधिकरण्येन हेतुमत्ताज्ञानं तथा ; तत्र सामानाधिकरण्येन हेतौ सामानाधिकरण्येन हेत्वभाववत्पक्षेऽतिव्याप्तिः तज्ज्ञानस्य तादृशाप्रतिबन्धकत्वतादृशहेतुमत्ताज्ञानकालीनत्वोभयाभाववत्त्वादिति ॥

**मैवम्** । यतःसामानाधिकरण्येन साध्यसिद्धिस्थलीयमवच्छेदकावच्छेदेन साध्यसिद्धिस्थलीयं च लक्षणं भिद्यते । तथा च साध्यतावच्छेदकसंबन्धेन साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकीभूतप्रकृतहेतुप्रकारतानिरूपितसांसर्गिकविषयिताशालिज्ञानं पक्षधर्मताज्ञानशब्देन विवक्षितमिति प्रथमे प्रकृतहेतुप्रकारतानिरूपितव्यापकत्वविशिष्टहेतुतावच्छेदकसंसर्गीयसांसर्गिकविषयिताशालिज्ञानप्रवेशः । यद्रूपावच्छिन्नविषयकनिश्चयश्च सामानाधिकरण्येन हेत्वभाववत्पक्षानवगाही निवेश्यः । द्वितीये प्रकृतहेतुप्रकारतानिरूपितशुद्धहेतुतावच्छेदकसंसर्गीयसांसर्गिकविषयताशालिज्ञानप्रवेशः । प्रकारान्तमुक्तं प्राक् ।

केचित्त्वसाधारण्यविषयकत्वविशिष्टपक्षधर्मताज्ञानकालीनत्वं विवक्षितं असाधारण्याविषयकत्वप्रकृतानुमित्यप्रतिबन्धकत्वोभयाभावो वेत्याहुः ।

अथैतन्मते वह्निव्यापकीभूताभावप्रतियोगि जलं वह्निमज्जलादित्यादौ समानाधिकरण्येन साधने सामानाधिकरण्येन हेत्वभाववत्पक्षेऽतिव्याप्तिः तज्ज्ञानस्य पक्षीभूतासाधारण्यविषयकत्वात् । अत्रासाधारण्यविषयताबहिर्भूतविषयताश्रयत्वं असाधारण्याविषयकत्वं, एवं च पक्षीभूतासाधारण्यविषयताबहिर्भूतहेतुविषयताशालितया नातिव्याप्तिरिति तु न सत् ; ह्रदो वह्निमान् जलादित्यादावुक्ताव्याप्त्यनुद्धारापत्तेः वह्निव्यापकीभूताभावप्रतियोगिजलं वह्निमदित्यादिज्ञानीयतथाविधवह्न्यादिविषयितासत्वात् ॥

अत्र केचित् । स्वभिन्नत्वस्वावच्छेदकतान्यत्वस्वसमानाधिकरणत्वैतत्त्रितयसंबन्धेन प्रकारत्वानवच्छिन्नासाधारण्यविशेष्यताविशिष्टविषयताशून्यत्वं निवेश्यमिति वदन्ति । असाधारण्याव्यापकविषयताशून्यज्ञानीयविषयताशून्यत्वं असाधारण्याविषयकत्वमित्यपि । पक्षतावच्छेदकावच्छेदेन हेतुमत्तानिश्चयकालीनत्वं निवेश्यम् । उक्तस्थले सामानाधिकरण्येन हेत्वभाववत्पक्षेऽतिव्याप्तिवारणाय यद्रूपावच्छिन्नविषयकनिश्चये प्रतिबन्धकतानवच्छेदकविषयताशून्यत्वं देयमित्येके । यद्रूपावच्छिन्नविषयितायां ज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयितानवच्छिन्नत्वोभयाभाववत्प्रतिबन्धकतायाः स्वरूपसंबन्धरूपावच्छेदकत्वं निवेश्यं वह्निव्यापकीभूताभावप्रतियोगि

जलं वह्निमज्जलादित्यादौ सामानाधिकरण्येन हेत्वभाववत्पक्षे तु नातिव्याप्तिः, तद्विषयितायाः सामानाधिकरण्येन हेतुमत्ताज्ञानप्रतिबन्धकतानवच्छेदकत्वात् साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकतायाः पक्षविषयितामात्रे सत्वेपि हेत्वभावविशिष्टपक्षविषयितायामसत्वात् । निरूपिततत्वमेतत् ॥

एवं सति अनुमित्यप्रतिबन्धकत्वपक्षधर्मताज्ञानकालीनत्वोभयाभावे व्यापकत्वनिवेशः वृक्षः संयोगी एतत्त्वादित्यादौ संयोगाभावविशिष्टवृक्षादिज्ञानस्य अव्याप्यवृत्तित्वज्ञानाभावविशिष्टस्य प्रतिबन्धकतया तद्वारणायेत्यन्ये । यद्विषयिताव्यापिका प्रकृतानुमितिप्रतिबन्धकता तदन्या या अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानप्रतिबन्धकतावच्छेदविषयिता तदन्यत्वं यद्रूपावच्छिन्नविषयिताविशेषणं सामानाधिकरण्येन हेत्वभाववत्पक्षविषयिता तावत् तथाविधहेतुमत्ताज्ञानप्रतिबन्धकतावच्छेदिकेति नातिप्रसङ्गः सामानाधिकरण्येन हेत्वभाववत्पक्षरूपदोषसंग्रहाय तत्रान्यान्तमिति परे । **वस्तुतः** स्वव्यापकप्रकृतानुमितिप्रतिबन्धकत्वमुपेक्ष्य स्वव्यापकज्ञानवैशिष्ट्यानवच्छिन्नप्रकृतानुमितिप्रतिबन्धकताकान्यत्वमेव विषयिताविशेषणमितीतरे ।

**यत्तु** यत्र भाविज्ञानं हेत्वभाववत्तांशे अप्रमेत्यप्रामाण्यज्ञानं ततः क्रमेण पक्षे सामानाधिकरण्येन हेत्वभाववत्ताज्ञानं ततः तत्रावच्छेदकावच्छेदेन हेतुमत्ताज्ञानं तत्राप्रामाण्यग्रहाभावविशिष्टज्ञानवृत्तितथाविधहेत्वभाववत्पक्षविषयिताश्रयज्ञानेऽप्रामाण्यग्रहदशावच्छेदेनाप्रतिबन्धकत्व—तादृशहेतुमत्ताकालीनत्वोभयसत्वादतिव्याप्तिशङ्कैवायुक्ता । न च ज्ञानं घटवत् प्रकारित्वादित्यादौ सामानाधिकरण्येन हेत्वभावप्रकारकज्ञाने तद्व्यक्तित्वं धर्मितावच्छेदकीकृत्यापि अप्रामाण्यग्रहे ज्ञानत्वसामानाधिकरण्येनाप्रामाण्यघटकप्रकारित्वप्रकारतावगाहिनि अवच्छेदकावच्छेदेन प्रकारित्वाभावहेतुमत्ताग्रहस्य आहार्यानाहार्यतादृशहेतुमत्ताज्ञानकालीनत्वासंभवात् उभयाभावनिर्वाहेण तत्र सामानाधिकरण्येन हेत्वभाववत्पक्षेऽतिव्याप्तिर्दुरुद्धरैवेति वाच्यम् ॥ भ्रमत्वसंशयसत्वे हेतुमत्ताज्ञानस्यानाहार्यत्वात् । न च विशेष्यतापक्षोऽभावाधिकरणावृत्तित्वं हेतुरित्यत्र विशेष्यता अभाववन्निष्ठेति सामानाधिकरण्येन हेत्वभावग्रहस्य तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताकत्वरूपभ्रमत्वग्रहदशायामवच्छेदकावच्छेदेन हेतुमत्ताग्रहस्यानाहार्यस्यासंभवात् तद्विषयेऽतिव्याप्तिर्दुर्वारैव; प्रकारतावच्छेदकांशे संशयस्यानङ्गीकारेण तदभाववन्निष्ठत्वांशे संशयात्मकाप्रामाण्यज्ञानासंभवादिति वाच्यम् । तज्ज्ञानीयतन्निष्ठप्रकारता तादृशविशेष्यतानिरूपिता न वेति अप्रामाण्यसंशयसंभवात् इति ॥



तन्न । तथा सति असंभवापत्तेः; भाविबाधज्ञानमप्रमेत्यादिज्ञानदशायामप्रतिबन्धकत्वादेरावश्यकत्वात् प्रतिबन्धकताप्रतियोग्येवेति । तस्याः व्याप्यवृत्तित्वे चातिव्याप्तिशङ्काया युक्तत्वात् । **सङ्ग्रहाच्चेति** ।

**इदं तु बाध्यम्**—ह्रदादौ धूमवत्तानिश्चयेऽपि ह्रदादौ लौकिकसन्निकर्षजन्यधूमाभाववत्तानिश्चयमादाय अतिव्याप्तिरतो विशेषणदलसार्थक्येऽपि अतीन्द्रियपक्षहेतुकस्वरूपासिद्ध्यादेरनाहार्यतादृशनिश्चयाप्रसिद्ध्या सामान्यलक्षणाव्याप्तिः एतस्य विशेषलक्षणमात्रपरत्वे निरुक्तासाधारण्यस्य हेत्वाभाससामान्यलक्षणानाक्रान्ततया अलक्ष्यतापत्तिरिति ।

अथात्राशङ्कितसत्यन्तार्थविरहो न समाहितः । न च कल्पद्वयेऽपि वैयर्थ्येन पक्षधर्मताज्ञानकालीनत्वाप्रवेशात् तत्समाधानं सुलभमिति वाच्यं; तत्प्रवेशभ्रमेण सत्यन्तार्थविरहस्याशङ्कितुमयुक्ततया यत्र विषयविशेषेऽसाधारण्यनिश्चयोऽप्रतिबन्धकोऽप्रसिद्धः तत्रैव सत्यन्तार्थविरहस्यावश्यकत्वेनाशङ्कितत्वादिति चेत्तर्हि प्रतिबन्धकतामसाधारण्यविषयितानवच्छिन्नत्वेन विशेष्य तत्समाधानस्य वाच्यत्वात् ।

अथानुमितिविरोधिताघटकप्रतिबध्यतायां पक्षे हेतुसाध्यवैशिष्ट्यावगाहितादृशज्ञानत्वन्यूनवृत्तित्वनिवेशपक्षावलम्बनमसङ्गतमापद्येत । असाधारण्यज्ञानप्रतिबध्यतायास्तदन्यूनवृत्तित्वेनासाधारण्येऽव्याप्तेरिति चेत् ; साध्यव्यापकीभूताभावप्रतियोगित्वस्य विरोधत्वपक्षे तथावलम्बनं, तदसाधारण्यरूपतापक्षे हेतुवैशिष्ट्यावगाहिज्ञानत्वान्यूनवृत्तित्वमात्रं तत्र । बाधवारणार्थं च पक्षसाध्यवैशिष्ट्यज्ञानविरोध्यसाधारण्याविषयकज्ञानान्यत्वं विरोधिज्ञानविशेषणम् । **विरोध इति** । विरुद्धं विरोधः नातोऽव्यावर्तकताप्रसङ्गः ।

**रूपान्तरेणेति** । न च जातिर्गोत्वसमानाधिकरणा गोत्वं जातिसमानाधिकरणमिति ज्ञानयोरप्रतिबध्यत्वेऽपि गोत्वमश्वत्वसमानाधिकरणमिति ज्ञानस्य प्रतिबध्यत्वादेव न दोष इति वाच्यम् । साध्यसाधनसामानाधिकरण्यग्रहनिष्ठप्रतिबध्यतानिवेशे साध्यसाधनसामानाधिकरण्यविषयकव्याप्तिविषयकज्ञानमादायासंभव इति किञ्चिद्धर्मावच्छिन्नविशेष्यकप्रकृतसाध्यसामानाधिकरण्यग्रहत्वाव्यापकप्रतिबध्यतानिवेशे जातिः गोत्वसमानाधिकरणेत्यादिज्ञानसङ्ग्रहो दुर्वारः । तथाच हेतुतासाध्यतावच्छेदकयोरनिवेशे कामिनीजिज्ञासाप्रतिबन्धकतामादायाव्याप्तिः व्यापकत्वाप्रसिद्धिर्वा स्यात् इत्यर्थः ।

किञ्चिद्धर्मत्वेन निवेशश्च प्रकृतसाध्यतावच्छेदकादिनिवेशपर्यवसन्नः । न च साधनधर्मिकसाध्यसामानाधिकरण्यप्रकारित्वावच्छिन्नप्रतिबध्यतैव निवेश्या लाघवात्; तावतापि चाक्षुषस्पर्शवान् स्पार्शनशब्दादित्यादौ विशेष्यतयोरसामानाधिकरण्यस्य वारणसंभवात् विशिष्टसाध्यसाधनसामानाधिकरण्यप्रकारिताया विशेष्यसाध्यसामानाधिकरण्यप्रकारितात्वेन प्रतिबध्यतावच्छेदकत्वात् साध्यसाधननिष्ठावृत्तित्वयोश्च सत्यन्तेनैव वारणात् । तथाच साध्यतावच्छेदकहेतुतावच्छेदकयोर्निवेशवैयर्थ्यमिति वाच्यं; साध्यतावच्छेदकहेतुतावच्छेदकयोर्निवेशोऽपि वह्निमान् जलादित्यादौ साधारण्येऽव्याप्तेः वह्निसामानाधिकरण्याभाववान् वह्न्यभावसामानाधिकरण्यवान् अयं च वह्न्यभावसामानाधिकरण्यवानिति ज्ञानस्य साध्यसाधनसामानाधिकरण्यग्रहविरोधित्वात् ।

यदि च साध्यसाधनसामानाधिकरण्यप्रकारित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकतापर्याप्त्यनधिकरणधर्मवत्त्वं विवक्षितम् । वृत्तित्वसामानाधिकरण्येनैव साध्यवन्निरूपितत्वनिवेशात् साध्यवदनिरूपितवृत्तित्वविशिष्टसाधनादेर्न विरोध इति न तत्रातिव्याप्तिः दलान्तराभावात् । यदि च स्थलविशेषे अवच्छेदकधर्मदर्शनविधया साधारण्यज्ञानं प्रतिबन्धकमेव तदा तद्व्यापकप्रतिबध्यतोक्तावपि तत्साधारण्यातिव्याप्तेस्तादृशस्थलाप्रामाणिकत्वस्यैवावलम्बनीयत्वादित्युच्यते साध्यसाधनसामानाधिकरण्यप्रकारकग्रहत्वाव्यापकत्वकल्पे तद्द्वयोपादानसार्थक्यम् । न च साध्यसाधनसामानाधिकरण्यप्रकारित्वानवच्छिन्नत्वं प्रतिबध्यतायामेवास्तु साध्यसाधनसामानाधिकरण्यघटितसाध्यके व्यभिचाराव्याप्तेः । एतच्च पूर्वकल्पेऽपि द्रष्टव्यम् ।

अथवा पक्षवृत्तित्वशब्दार्थघटकहेतौ साध्यसामानाधिकरण्यं विशेषणमित्येतत्परमिदं, तथाच पक्षांशे साध्यतत्सामानाधिकरण्यविशिष्टहेतुप्रकारकज्ञानसामान्याविरोधित्वमर्थः, तत्र च तदुभयोपादानमावश्यकम् । अथवा सिद्धान्ते यादृशः साध्यसाधनसामानाधिकरण्यग्रहाविरोधित्वपदार्थो निवेश्यस्स एवेह प्रदर्शितः । अत एव एतदर्थः पूर्वपक्ष एव निवृत्त इति ग्रन्थकारो वक्ष्यतीति कृतबुद्धयो विदांकुर्वन्तु ।

**अविरुद्धेति** । अनुमितिविरोधित्वघटकयद्रूपावच्छिन्नविषयितायामेव तादृशज्ञानप्रतिबन्धकतानवच्छेदकत्वं विशेषणमिति तु गुरुतरम् । एकोक्तिरक्षणे निर्भरश्चेदाह-**वस्तुतस्त्विति** । प्रकृतपक्षे प्रकृतसाध्यप्रकृतसाध्यसामानाधिकरण्यविशिष्टप्रकृत-



हेतूभयत्वप्रकारकज्ञानाव्यापकत्वनिवेशो अव्यापकत्वद्वयनिवेशमपेक्ष्य लघुरिति तु बोध्यम् । अत्र सिद्धान्त एव विरुद्धान्यत्वमुक्तं न त्वत्र अनुमितिविरोधित्वदले पक्षे साध्यसाध्याव्यभिचारविशिष्टहेतुप्रकारकानुमितिरेव निवेश्यते न तु हेत्वंशे साध्यसामानाधिकरण्यमपि । तथा च साध्यासमानाधिकरण्येऽतिव्याप्तेरसत्वात् तद्वैयर्थ्यमित्यपि वदन्ति । **विशिष्टहेतौ विशिष्टपक्षेति** ॥ विशिष्टपदयोः प्रयोजनं स्फुटमेव । **आक्षिपतीति** । आक्षेपबीजं च साध्यनिष्ठाभावाप्रतियोगित्वरूपानुपसंहार्येऽव्याप्तिः । **प्रकृतेति** । तथाविधयद्रूपावच्छिन्नप्रकारतायां स्वरूपसंबन्धरूपतदवच्छेदकत्वनिवेशो साध्यव्यापकीभूताभावप्रतियोगित्वरूपविरोधेऽतिव्याप्तिरतोऽनतिरिक्तवृत्तित्वरूपतन्निवेशो-निश्चयत्वनिवेशलभ्यः । **हेतुतेति** ।

नचैतद्विशेषणेपि न तादृशातिप्रसङ्गवारणसंभवः, तद्रूपावच्छिन्नस्य प्रकृतहेतुनिष्ठत्वादिति वाच्यम् । हेतुतावच्छेदकीभूतयद्रूपावच्छिन्नविशेष्यकयद्रूपावच्छिन्ननिश्चयत्वमनुमितिप्रतिबन्धकतावच्छेदकं तद्रूपावच्छिन्नत्वे सति तद्रूपावच्छिन्नवत्त्वमित्यर्थे तादृशातिप्रसङ्गवारणात् । **विरोधित्वमेवेति** । यद्रूपावच्छिन्नप्रकारताशालिनिश्चयत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नत्वमेवेत्यर्थः । असाधकतानुमितौ पक्षवृत्तित्वात्मकविशेषणवैयर्थ्यमग्रे वक्तव्यम् । तच्च दुष्टलक्षणाभिप्रायकत्व एव निर्वहतीत्याशयेन समाधत्ते—**मैवमिति** ॥

नन्वेवं विरुद्धोऽप्यनेत रूपेण सव्यभिचार एव उपाधेश्च न सङ्कर इति मूलविरोधः; दुष्टलक्षणाभिप्रायकत्वे विरोधासाङ्कर्यकथनस्याकिञ्चित्करत्वादित्यत आह—**अथवेति** ॥ एतत्कल्पे च दोषलक्षणे पक्षवृत्तित्वस्यावश्यकत्वेपि असाधकताव्याप्यतावच्छेदकत्वं न घटत इत्याशयेन तन्मूलं योजनीयम् । यद्वा एवं सति सव्यभिचारपदस्य पारिभाषिकत्वं स्यान्न यौगिकत्वमित्यतो**ऽथवेति** । तन्मतेऽपि व्यभिचारान्यपरामर्शविरोधित्वात्—**तत्साध्यकेति** । तत्पक्षकत्वाप्रवेशात् अन्यपक्षकतत्साध्यहेतुकानुमितेरपि सामान्यान्तर्गतत्वात् । तद्धेतुकत्वं च तद्धेतुविषयकपरामर्शजन्यत्वं परामर्शेपि तत्पक्षकत्वस्य न प्रवेशः । तथा सति अनुमितावपि तल्लाभेनोक्तदोषस्य दुर्वारतापत्तेः । तत्पक्षाविषयकपरामर्शात्मकत्वं वा । तेन व्यभिचारस्य साक्षादनुमित्यविरोधित्वेऽपि न क्षतिः । एवं च पक्षाप्रसिद्धौ स्वरूपासिद्धौ च नातिव्याप्तिप्रसक्तिः । यदि च तत्साध्यकप्रकृतहेतुविशेष्यकव्याप्त्यनुमितिर्निवेश्यते तदा पक्षवृत्तित्ववैयर्थ्यं स्यात् । **वैयर्थ्यमिति** । प्रसिद्धबाधप्रतिरोधयोरपि तथाविधानुमितिसामान्यं प्रति अविरोधित्वात् ।

**साध्येति ।** निर्धर्मितावच्छेदककतद्वत्ताग्रहं प्रति तन्निष्ठावृत्तित्वज्ञानस्य प्रतिबन्धकत्वात् धर्मितावच्छेदकानिवेशेन सकलतदनुमितिप्रतिबन्धकत्वात् । **सत्यन्तदलेनैवेति ।** स्वरूपासिद्धेःसाक्षादेवानुमितिविरोधितेति भावः । पक्षाप्रसिद्धिसाधनाप्रसिद्ध्योःयदि साक्षाद्विरोधिता तदैतेन वारणं बोध्यम् । अत्र वृत्तिमत्त्वग्रहविरोधित्वेनैव तद्वारणे पक्षपदं व्यर्थम् । यद्वा पक्षवृत्तिपदमेव हेतुपरम् । भावप्रत्ययार्थश्च तत्प्रकारकग्रहविरोधित्वमिति जगदीशमतं निरस्यति— **अत एवेति ।**

अथात्र हेतुसंबन्धितया विरोधित्वं किं ? न तावत् सामानाधिकरण्यसंबन्धेन हेतुतावच्छेदकविशिष्टत्वे सति तद्रूपावच्छिन्नत्वं ह्रदो वह्निमान् धूमादित्यादौ ह्रदवृत्तिवह्न्यभाववान् धूम इति ज्ञाने हेतुतावच्छेदकीभूतधूमत्वावच्छिन्नविशेष्यकह्रदवृत्तिवह्न्यभावत्वरूपयद्रूपावच्छिन्नप्रकारकतया हेतुतावच्छेदकविशिष्टतद्रूपावच्छिन्नत्वस्य तादृशबाधे सत्वेनातिव्याप्तेः । हेतुविषयताया उदासीनत्वेपि अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्याक्षतत्वात् । पूर्वं **भट्टाचार्यैरेव** विरोधित्वपदवर्णनावसरे निश्चयत्वनिवेशेनानतिरिक्तवृत्तित्वप्रवेशोऽभिमतस्तेषामिति लभ्यते । न च तत्साध्यकतद्धेतुकानुमितिसामान्यनिवेशान्न दोष इति वाच्यम् । ईदृशयत्नस्य घटत्वादिपक्षहेतुकबाधादिमात्रवारणार्थतया ततोऽन्यत्र तस्य तद्वारकत्वस्य दुर्वचत्वात् । न चात्र विशिष्टान्तराघटितत्वेन वारणसंभवः, स्वावच्छिन्नाविषयकज्ञाननिष्ठानुमितिप्रतिबन्धकतानतिरिक्तवृत्तिर्यद्रूपावच्छिन्नप्रकारतानिरूपितप्रकृतहेतुविशेष्यता तद्रूपावच्छिन्नविषयिताशून्यप्रतीतिविषयत्वस्य तदर्थत्वात् । अत्र प्रकृतहेतुविशेष्यताया अनिवेशे केवलव्यभिचारविषयिताया अप्रतिबन्धकज्ञानसाधारणतया मेयत्वादिविशिष्टव्यभिचारेऽतिव्याप्तिः अतस्तन्निवेशः ।

**मैवं;** विरोधिताघटकप्रकृतहेतुविशेष्यतायाः स्वरूपसंबन्धरूपप्रतिबन्धकतावच्छेदकत्वेन विशेषणीयत्वात् । अथवा हेतुविशेष्यतानिष्ठायां तत्साध्यकतद्धेतुकानुमितिप्रतिबन्धकतावच्छेदकतायां अवच्छेदिका या प्रकारता तदवच्छेदकतापर्याप्त्यधिकरणं यद्रूपं तद्रूपवत्त्वे सति हेतुतावच्छेदकविशिष्टत्वं विवक्षितम् । एवं च विशिष्टान्तराघटितत्वं न देयं यद्धर्मावच्छिन्नविशेष्यतात्वेनेत्यादिरीत्या विवक्षणान्मेयत्ववह्न्यादिविषयिताया वह्न्यादिविषयितात्वेन विरोधितावच्छेदकत्वेऽपि न क्षतिः ।



अत्र हेतुतावच्छेदके विशेष्यताच्छेदकतापर्याप्तिर्न निवेश्या, तथा सति धूमवान् काञ्चनमयवह्नेरित्यादौ व्यभिचारेऽव्याप्तेः । एवं च साधनाप्रसिद्धौ अतिव्याप्तिरिति तु न शङ्क्यम् । **वस्तुतस्तु** तादृशविरोधितावच्छेदकीभूतप्रकारतावच्छेदकं यद्रूपं तद्वत्त्वं सत्यन्तार्थः प्रमेयत्वादिविशिष्टसाध्याभाववद्वृत्तित्ववारणाय तादृशप्रकारतायां विशेषणविधयावच्छेदकं यद्रूपावच्छिन्नप्रकारतात्वमिति विवक्षितम् । धूमवान् वह्नेरित्यादौ वह्निहेतुकानुमितिसामान्यं धूमसाध्यकानुमितिसामान्यं प्रति च व्यभिचारज्ञानादेर्न विरोधितेति तत्साध्यकतद्धेतुकत्वनिवेशः । साध्यव्यापकीभूताभावप्रतियोगित्वं चासाधारण्यं तत्प्रकारतायाश्च विरोधितावच्छेदकत्वाल्लक्षणसमन्वयः । यदि वह्निः काञ्चनमयवह्निमान् धूमादित्यादौ धूमनिष्ठकाञ्चनमयत्वव्यापकीभूताभावप्रतियोगित्वे दोषानात्मकेऽतिव्याप्तिः तज्ज्ञानस्य वह्निः धूमवानिति ज्ञानसहकारेण वह्निविशेष्यककाञ्चनमयत्वप्रकारकज्ञानविरोधित्वादिति मन्यते तदा तद्धेतुकतत्साध्यकानुमितित्वव्यापकप्रतिबध्यतायां विशिष्टसाध्यग्रहत्वाव्यापकत्वस्य साध्याप्रसिद्धिवारकदलेन विवक्षितत्वान्न दोषः । यदि तु हेतुः साध्यव्याप्य इत्येवानुमितिस्तद्धेतुकतत्साध्यकानुमितिपदार्थः तदा साध्यवदवृत्तित्वमसाधारण्यं बोध्यम् । अन्यत्स्वयमूह्यम् ।

**ज्ञानस्येति ।** यत्र यत्सामानाधिकरण्याभावो गृह्यते ततः तद्धर्मितावच्छेदकतत्प्रकारकग्रहो न भवति; घटो भूतलावृत्तिरिति ग्रहे भूतलं घटवदिति ज्ञानानुत्पादात् । **विशिष्टसाधनेति ।** धूमवान् धूमाभाववदवृत्तिवह्नेरित्यादौ । क्वचित्तु द्रव्यं द्रव्यत्वाभाववदवृत्तिसत्वादिति पाठः । **सन्दर्भविरुद्धत्वादिति ।** उदासीनविषयिताकपदार्थघटितदोषमादाय दुष्टसामान्यादिलक्षणसङ्गमनस्य सुकरतया तद्वारकविशिष्टान्तराघटितत्वप्रवेशविरोधादिति भावः । **विरुद्धोऽपीति ॥** केचित्तु विरुद्धोऽपीत्यत्रेदंपदेनासाधारण्यमेव परामृश्यते । तथाच वह्निमान् गगनादित्यादावेवातिव्याप्तिराशङ्कितेति न ग्रन्थासङ्गतिरित्याहुः एतदज्ञानेति मूले एतदिति षष्ठ्यन्ताव्ययमिति **तर्कालङ्कारोक्तेः ।**

**अप्रामाणिकत्वादिति ।** तेन प्रत्येकधर्मज्ञानप्रतिबन्धकताप्रयुक्तं सामान्यधर्मज्ञानस्याप्रतिबन्धकत्वमिति यथाश्रुतार्थो नादेयः । पारिभाषिकदुष्टलक्षणस्य निर्देषत्वेऽपि सिद्धिमादाय सव्यभिचारपदस्य यौगिकत्ववारणार्थमाह—**ह्रदो वेति ।** वह्निमान् गगनादित्यादौ । दीधितौ **वत्यर्थः** समानधर्मवत्त्वरूपं सादृश्यम् । तच्च वृत्तिमत्त्वेन आभासमानत्वमाश्रयत्वं हेतुसदृशत्वे सति दोषवत्त्वं वा वाक्यार्थमात्रम् । **साध्येति ।** वृत्तिमत्त्व-

प्रकारकग्रहप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकत्वपर्याप्त्यनधिकरणीभूतयद्रूपावच्छिन्नविषयिता प्रकृतहेतौ प्रकृतसाध्यव्याप्यत्वग्रहप्रतिबन्धकतानतिरिक्तवृत्तित्वे सति प्रकृतहेतौ प्रकृतसाध्याभावव्याप्तिग्रहप्रतिबन्धकतानतिरिक्तवृत्तिः तद्रूपावच्छिन्नत्वं व्यभिचारत्वं अवृत्तित्वविशिष्टगगनत्वरूपं यद्वृत्तिमत्वग्रहविरोधितावच्छेदकं तद्भिन्नत्वस्य साध्यतदभावव्यावृत्तत्वविशिष्टगगनत्वेऽसत्वादसाधारण्येऽव्याप्तिरतः पर्याप्तिप्रवेशः। सद्धेतौ साध्याभावव्याप्यत्वाभावस्य विरुद्धे साध्यव्याप्यत्वाभावस्य वारणाय क्रमेण विशेषणसार्थक्यम्।

यद्वा सद्धेतौ साध्यसामानाधिकरण्यमात्रस्य वारणाय तत्। एवं च गगनवान् वह्नेरित्यादौ साध्यनिष्ठावृत्तित्वस्य साध्याभावव्याप्यत्वग्रहाविरोधित्वादेव नातिव्याप्तिः॥ ननु काञ्चनमयवह्निमान् काञ्चनमयधूमादित्यादौ साध्यसाधनाप्रसिद्धयोरुभयव्याप्तिग्रहविरोधितया अतिव्याप्तिरत आह—**विशिष्टेति**। दशाविशेषे असाधारणयोः **व्याप्यविरुद्धयोः** शब्दोऽनित्यः शब्दत्वात् गगनमनित्यं शब्दाश्रयत्वादित्यनयोः। **अभिप्रेत्येति** अग्रिमयदीति पक्षमभिप्रेत्य, तन्मते वृत्तिमत्त्वविरुद्धत्वज्ञाननियमात्। तदनियमे तु नोचेदित्यस्य वक्ष्यमाणत्वात्, साध्याभावाभाववदवृत्तित्वघटितस्येत्यग्रिमलक्षणे। **न त्विति**। महानसीयवह्न्यभावविशिष्टमहानसीयप्रमेयवह्न्यभाववत्ताज्ञानस्य वह्निमत्ताज्ञाने प्रतिबन्धकत्वाभावात्। **नो चेदिति**। ग्राह्याभावानवगाहितया वृत्तिमत्त्वग्रहविरोधीत्यादिः। साध्यवदन्यावृत्तित्वं प्रति साध्यवदन्यवृत्तित्वं विरुद्धसाधारणं, विरोधिशब्दो अनित्यः शब्दत्वादित्यादौ। नोचेदिति पक्षे वह्निमान् गगनादित्यादावेव वा असाधारण्यसंग्रहाय साध्यतदभाववद्वृत्तित्वप्रवेशः। एवं च वृत्तिमत्त्वग्रहाविरोधित्व सार्थक्यं पूर्ववत्।

**उपाध्यायमतं** व्याप्यविरुद्धयोरतिव्याप्तिवारणाय साध्याव्याप्यत्वादिपदस्योक्तार्थमकृत्वा साध्यादिव्याप्तौ विशेषणान्तरं ददत उपाध्यायस्य मतम्। **असाधारण्याभावस्य** तदधिकरणत्वस्य, तेन कालान्तरे शब्दत्ववृत्तेरिदानीं घटत्ववृत्तेरसाधारण्याभावस्यैकत्वेन शब्दत्वनिष्ठासाधारण्यावच्छेदक्षणस्य तदवच्छेदकत्वेपि न क्षतिः। तत्कालादीत्यादिपदं चिन्त्यं, तत्पुरुषीयत्वपरिग्रहासंभवात्। स्वस्य पक्षतादशायां पुमन्तरस्य हेतुमद्विशेष्यकसाध्यादिमत्तानिश्चयमादायासाधारण्यभङ्गवारणाय तत्पुरुषीयत्वं निवेशितम्। तच्च नासाधारण्यस्यानित्यदोषतानिर्वाहकम्। पुमन्तरस्य हेतुमति



साध्यादिमत्तानिश्चयेपि यस्य तत्संशयस्तस्य तद्घटितासाधारण्यस्याक्षतत्वात्। धूमवान् वह्नेरित्यादौ वह्निमान् धूमवान्न वेति संशयदशायां उत्पन्नसाध्यादिमत्तानिर्णयसत्वेऽसाधारण्यसत्वादतो घटो नित्यो मेयत्वादित्यादौ हेतुमति साध्यसन्देहदशायां घटादौ साध्यादिमत्तानिश्चयोपगमेऽपि हेतावसाधारण्यासत्वादव्याप्तिमाह—**यादृशेति**। क्रमेण कल्पत्रयं परिष्करोति– **तत्तत्कालेति**॥

असाधारण्यघटककाल एव विशिष्य निवेशितः। नचैकस्य हेतुमत्तासाध्यादिमत्तानिश्चयः अन्यस्य तत्संशयस्तत्र तत्कालीनहेतुमति साध्यादिमत्तानिश्चये सन्दिग्धपुरुषवृत्तित्वासत्वस्य अभावीयविशिष्टाभावाप्रयोजकतया निश्चयवत्पुरुषीयासाधारण्याभावसत्वं दुर्भिक्षमिति वाच्यं; पुरुषात्मकविशेषणस्यासाधारण्यानित्यदोषत्वानिर्वाहकतया सन्दिग्धपुरुषघटितासाधारण्येपि निश्चितपुरुषघटितासाधारण्यस्यानपायात्। तत्कालावच्छिन्नतत्कालघटितासाधारण्यसत्वेपि कालान्तरावच्छिन्नकालान्तरघटितासाधारण्याभावसत्वादव्याप्तिरतोऽभावकूटनिवेशः।

**अन्तत इति**। तथा च हेतुमति साध्यादिमत्तासन्देहदशायां अन्यत्र साध्यादिमत्तानिश्चयस्यालीकत्वे हेतोर्नासाधारण्यं; हेतुमति साध्यादिमत्तानिश्चयेपि गगनादावसाधारण्यप्रसिद्धिरित्यर्थः॥ एवं सत्यसाधारण्यनिवेशो व्यर्थः। तत्तत्कालावच्छिन्नत्वविशिष्टाभावस्यैव सम्यक्त्वात्। न च वह्निमान् धूमादित्यादौ तत्तत्कालवृत्तित्वविशिष्टपदार्थवत्तादशायामतिव्याप्तिरिति असाधारण्यनिवेश इति वाच्यं; अवतार्यकल्पे तत्काले तत्रातिव्याप्तिवारणाय तत्र तत्कालावच्छिन्नधूमादेर्लक्ष्यत्वस्यैवोपेयत्वात्। अत एतत्कल्पेऽसाधारण्यनिवेशवैयर्थ्यात्कूटनिवेशापाताच्च। एवं गगननिष्ठासाधारण्यस्य हेतावभावस्य व्याप्यवृत्तितया तदवच्छेदककालाप्रसिद्धेश्चेत्यत आह—**अथवेति**।

**शब्द इति**। ननु यदा हेतुमति साध्यसंशयः साध्यनिश्चयश्च नास्ति किंतु अन्यत्रैव साध्यादिमत्तानिश्चयःतत्क्षणस्य हेतुमद्विशेष्यकसाध्यादिनिश्चयानधिकरणत्वयत्किंचिद्विशेष्यकसाध्यादिनिश्चयाधिकरणत्वोभयवत्तया तदुभयाभाववानन्य एव क्षणः तदवच्छिन्नव्याप्तिशून्यत्वसत्वादतिव्याप्तिः। अत्र **केचिदिष्टापत्तिमेवाहुः**। **परे तु** हेतुमद्विशेष्यकसाध्यादिसंदेहाधिकरणत्वयत्किञ्चिद्विशेष्यकसाध्यादिनिश्चयाधिकरणत्वोभया-

भाववत्क्षण एवासाधारण्याभावकालस्तदवच्छिन्नत्वविशिष्टसाध्यव्याप्तिशून्यत्वं निवेश्यातिव्याप्तिं वारयन्ति ॥

**व्याप्तिद्वयस्याभावः** । व्याप्तद्वयभावद्वयं तेन व्याप्यविरुद्धयोरसाधारण्योत्तीर्णतादशायां नातिव्याप्तिः । तृतीयकल्पावलम्बिमतमाह—**प्रकृतेति** । असाधारण्याभावपदलभ्यात्यन्तभावापरित्यागादुदक्षरत्व**मस्वरसः** । इह व्याख्यायां, अन्यथेहेत्यस्य वैयर्थ्यात् । तेन द्वितीयस्य भेद इत्यत एव प्रथमलक्षणलाभात् ज्ञानविरोधिताघटितलक्षणयोर्मध्ये प्रथमे इत्येव ज्यायः । तद्घटकज्ञानान्वयि व्याप्यत्वं व्यापकसामानाधिकरण्यमित्यर्थात् । **आवश्यकतयेति** । यदा तत्पुरुषस्य पक्षे साध्यादिमत्तासन्देहः पुरुषान्तरस्य पक्षे साध्यादिमत्तानिश्चयस्तदाऽसाधारण्यानुपपत्तिभयेनेत्यादिः ।

**अनुचितमिति** । अन्यथा अत एवे(मूलस्थेत्यर्थः)त्यत एवासाधकतानुमानवैयर्थ्यलाभे व्यर्थविशेषणत्वादित्यस्य पौनरुक्त्यापातात् । समानानुपूर्वीकमणिवाक्यनां भिन्नार्थकत्वनियमाच्च ॥ **मानाभावादितीति** । विरोधादेः व्यभिचारपदार्थत्वाभावसाधकाभावादित्यर्थः । नचैवं पूर्वलक्षणेऽपि स्वरूपासिद्ध्यादेः पार्थक्ये मानाभावः सुवचः व्यभिचारवत् विरोधस्यावृत्तित्वस्य चोक्तसाध्यव्याप्तिधीविरोधित्वात् । विरोधस्य व्यभिचारस्य साध्याव्यभिचारविशिष्टसाध्यसामानाधिकरण्याभावस्य वा व्याप्यत्वाद्वा न पार्थक्यं; स्वरूपासिद्ध्यादेश्च न तथा इत्याशयेन मणिकृता तत्रासाधकतानुधावनात् । एवं पूर्वलक्षणेऽनुमितिविरोधित्वस्य एतल्लक्षणे व्याप्तिद्वयग्रहविरोधित्वस्योत्कीर्तनेन दूषकतायामुपयोगात् तदनुपयोगो नोक्तः । घटो वट इतिवन्निराकाङ्क्षतावारणाय—**सर्वेति** ।

**दूषकतेति** । सपक्षविपक्षव्यावृत्तत्वं चोदासीनविषयिताकपदार्थघटितमिति न तस्य दोषता तदघटितत्वे विरोधव्यभिचारयोरैक्यप्रसङ्ग इति भावः ॥ **पक्षातिरिक्तवृत्तीति** ॥ शुक्लगौरश्वो गोत्वादिति विरुद्धे पक्षातिरिक्तो यःसाध्याभाववान् तन्मात्रवृत्तिभिन्नत्वादतिव्याप्तिरतः पक्षातिरिक्तिवृत्तित्वेन साध्याभाववन्मात्रवृत्तित्वं विशेषितम् । **पक्षवृत्तित्वस्येति** । पक्षतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यविशिष्टहेतुतावच्छेदकावच्छिन्नप्रकारकग्रहत्वव्यापकप्रतिबध्यताघटितोऽर्थः । आभासं व्यावर्तयितुमाह— **चस्त्वर्थे इति** । **पक्षे इति** । तद्व्यक्तिवृत्तित्वज्ञानं प्रतिबध्यं तद्व्यक्त्यवृत्तित्वज्ञानस्यैव तत्र विरोधित्वमित्याशयेनोक्तम् । ईदृशज्ञानस्य सर्वथाऽ-



प्रतिबन्धकत्वं स्फुटीचिकीर्षुः विशेषाभावज्ञाने सामान्यज्ञानमन्यत्र दृष्टं अतोऽत्रापि तत्प्रदर्शयति—**साध्यवदिति** ।

नन्वेवमसाधारण्यशरीरे विपक्षव्यावृत्तत्वोल्लेखो व्यर्थःसाध्यवद्वृत्तित्वग्रहविरोधित्वाप्रसक्तेः अनुतित्यौपयिकसंबन्धाभावत्वासत्वाच्च । एवं विरुद्धानामलक्ष्यत्वमप्यसङ्गतं सपक्षविपक्षव्यावृत्तत्वासत्वादित्यत आह – **सपक्षेत्यादि** । **यद्रूपेति** । यद्रूपविशिष्टविषयिता स्वरूपसंबन्धरूपजनकतावच्छेदिका तथाविधावच्छेदकताश्रयविषयितानिरूपकतावच्छेदकतापर्याप्त्यधिकरणं यद्रूपमिति यावत् । **येन केनापि रूपेणेति** । यत्किंचिद्रूपावच्छिन्ना यद्रूपवन्निष्ठप्रकारता तथाविधजनकतावच्छेदकेत्यर्थः । **अशक्यसमाधानमिति** ।

**यत्तु** यद्रूपावच्छिन्नविषयकज्ञानमनुमितिकारणं तद्रूपव्याप्यधर्मावच्छिन्नाभाव एव निवेश्यः एवं च द्वित्वादिवारणान्नातिव्याप्तिः । नचैवं पक्षावृत्तित्वविशिष्टसपक्षसत्वादेरभावमादायातिव्याप्तिरिति वाच्यं तद्रूपव्याप्यधर्मे तद्रूपघटकतानवच्छेदकनिश्चयत्वभिन्नरूपाघटितत्वनिवेशेन वारयितुं शक्यत्वात इति नाशक्यसमाधानतेति । **तदसत्** । नित्यःशब्दःशब्दत्वादित्यादौ नित्यो घट इति भ्रमकालीननिश्चितसाध्यवद्वृत्तित्वत्वस्य नित्यवृत्तित्वत्वव्याप्यत्वस्यासंभवादव्याप्तेरिति न किञ्चिदेतत् ।

**॥ इति सव्यभिचारपूर्वपक्षः ॥**

—:*:—

## ॥ सव्यभिचारसिद्धान्तः ॥

**संबन्धीति** ॥ एकसंबन्धिप्रकारकज्ञानादेवापरसंबन्धिस्मृतिरिति पूर्वपक्षिमत-निरासायानुभवसिद्धदृष्टान्तानुधावनम् । **उभयेति** । साधारणादिधर्मप्रकारकज्ञान-कारणत्वमतेपि साधारणादिधर्मविषयकज्ञानत्वेन हेतुत्वापरित्यागादिति भावः । **तस्मा-त्संशयं** प्रति साधारणादिधर्मविषयकज्ञानत्वेन हेतुत्वापरित्यागादिति भावः । तस्मा-त्संशयं प्रति साधारणधर्मवद्धर्मिज्ञानत्वेन हेतुताया अनाधिक्यात् । **पूर्वपक्षेति** । संशयजनकतावच्छेदके धर्मिविषयिताया अनाधिक्यादित्यर्थः । साधारणधर्मवद्धर्मिज्ञान-नाशोत्तरं संशयानुपगमादिति भावः । पूर्वं वस्तुतस्त्वित्यादिना साध्यसन्देहजनकतायामव-च्छेदकतावच्छेदिका या प्रकारता तदाश्रयत्वरूपपूर्वपक्षलक्षणपरिष्कारान्तरमुक्तं; तत्र प्रकारतानिवेशः पक्षधर्मतापदलभ्य इति तद्दूषणाय तदुपष्टम्भकमतमाशङ्कते—**अथेति धर्मिभानेति** । एतच्च साधारणधर्मवद्धर्मिज्ञानस्य नोपोद्बलकतेति सूचनाय । **निवेश स्थाने** इति । अन्यथा विषयतया नित्यत्वाद्युपस्थितेरपि संशयापत्तेः । **संशये साक्षाद्धेतुतायाः क्लृप्तत्वादिति** ॥ विप्रतिपत्तिजन्यसंशयसाधारण्येन तद्धर्मधर्मिता-वच्छेदकसंशयं प्रति तद्धर्मितावच्छेदकप्रकारकज्ञानत्वेन हेतुतायाः क्लृप्तत्वादित्यर्थः । अन्यथा विनश्यदवस्थसाधारणधर्मवद्धर्मिज्ञानजन्यकोट्युपस्थितितोऽपि संशयापत्तिरिति भावः । नन्वेवं विप्रतिपत्तिवाक्याधीनसंशये व्यभिचार इत्यत आह—**मानसेपि चेति** । **साधारणासाधारणधर्मवद्धर्मीति** ॥

न च साधारणधर्मविषयकत्वं किमर्थमिति वाच्यं; तथा सति साधारणधर्म-विषयकज्ञानाधीनकोट्युपस्थितितोऽसाधारणधर्मवद्धर्मिज्ञानात् संशयापत्तिरिति तन्नि-वेशात् । **धर्मिविशेषः** । फलीभूतसंशयधर्मितावच्छेदकावच्छिन्नः ॥ **धर्मि-विषयताघटितत्वादिति** ॥ एकस्मिन्धर्मिणि विरुद्धकोटिद्वयप्रकारकज्ञानत्वस्यैव संशयत्वरूपत्वादिति भावः ।

नन्वेकविशेष्यतानिरूपितविरुद्धकोटिद्वयप्रकारताशालिज्ञानत्वं न संशयत्वं भट्टाचार्याणां मते तादृशप्रकारताया अलीकत्वात् । नापि विशेष्यतानिरूपितविरुद्ध-कोटिद्वयप्रकारत्वं, एकत्र द्वयमिति रीत्या भावाभावज्ञानस्य निर्धर्मितावच्छेदककस्य संशयत्वापत्तेरित्यत आह । **किंचिद्धर्मावच्छिन्नविशेष्यतात्वेनेति** । अवच्छेदक-



ताप्रभृत्येव निवेश्यत इति भावः । **दिगिति** । संशयत्वस्य कार्यतावच्छेदक-त्वाङ्गीकारो दिगर्थः ॥ **पूर्वेति** ॥ नित्यो ज्ञानादित्यादौ ज्ञानं नित्यत्वानित्यत्व-विषयकमिति ज्ञानजन्योपस्थितिमादायातिव्याप्तिरित्यर्थः । **पूर्ववत्** । साध्योपस्थि-तिसहकारित्वं साध्याभावोपस्थितिविशेषणं निवेश्य । **समवायादीति** । अनित्यः शब्दः शब्दत्वादित्यादौ आसाधारण्योत्तीर्णतादशायां साध्यादिमन्निरूपितसंयोगाव-च्छिन्नवृत्तित्वाभावमादायातिव्याप्तिरपि द्रष्टव्या । विशेष्यतायाः संबन्धानवच्छिन्नतया सव्यभिचारिताघटकसंबन्धावच्छिन्नत्वानिवेशादाह **प्रकृतेति** ॥ **तद्घटितत्वेनेति** । धर्मैक्यस्याप्रयोजकत्वे संबन्धैक्यस्याप्रयोजकतया नित्यविषयकनित्यत्वाभाववद्वृत्तिज्ञान-वत्ताज्ञानादपि संशयोदयादतिव्याप्तेः साध्यवद्वृत्तित्वेपि हेतुताघटकसंबन्धावच्छिन्न-त्वनिवेशः ॥

अथ वह्निवह्न्यभावसहचरितेन्धनसमानाधिकरणवह्निमान् धूमादित्यादौ प्रकृतसाध्यतदभाववन्निरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वस्य तादृशाधेयत्वघटितत्वादति-व्याप्तिर्दुर्वारैवेति चेन्न । साध्यतावच्छेदकावच्छिन्नसाध्यादिमन्निरूपिततादृशसंबन्धा-वच्छिन्नवृत्तित्वघटितत्वस्य विवक्षितत्वात् । एवं च हेतुतावच्छेदकसंबन्धानवच्छिन्न-वृत्तित्वहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तिभिन्नत्वोभयाभाववत्त्वं तादृशाधेयताघटितत्व-मिति **तुच्छतरं** अनित्यः शब्दत्वादित्यादौ साध्यादिमन्निरूपितसंयोगसंबन्धावच्छिन्न-वृत्तित्वाभावस्य निरुक्तोभयाभाववत्त्वरूपतादृशाधेयताघटितत्वादतिव्याप्तेः । प्रकृत-साध्याघटकतादृशाधेयताघटितत्वं विवक्षितमिति तु प्रलापः ॥ **अव्यावर्तकतयेति** ॥ ज्ञानं नित्यत्वानित्यत्वविषयकमिति ज्ञानजन्योपस्थितेरप्येतन्मते संशायकत्वात्साध्य-संशयजनकत्वस्यातिव्याप्त्यवारकतयेत्यर्थः ।

नन्वत्र साध्यसन्देहजनकत्वस्य त्यागेऽपि न क्षतिः पूर्वरीत्या साध्यासंदेहागर्भ-लक्षणव्याख्यानसंभवात् । तथाहि—अव्यवहितोत्तरत्वसंबन्धेन साधारणधर्मज्ञानविशिष्ट-तत्तत्कोट्युपस्थितित्वमेव संदेहजनकतावच्छेदकम् । अन्यथा यत्र नित्यत्वसमानाधि-करणं प्रमेयत्वं नित्यत्वानित्यत्वविषयकं च ज्ञानमित्याभ्यामेकैव नित्यत्वानित्यत्वोप-स्थितिर्जनिता तत्र साध्यसंशयोदयेन नित्यो ज्ञानादित्यादौ अतिव्याप्तेरिति साध्य-संदेहजनकतावच्छेदकावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयतेति क्रमेण परिष्कारासङ्गतिस्स्यात् । एवं च प्रकृतसाध्यताच्छेदकावच्छिन्नादिविषयकोपस्थितित्व-टितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्नजन्यतेत्यादिरीत्या साध्यसन्देहमनिवेश्यघ

पूर्वपक्षग्रन्थोक्तरीत्या परिष्कारःकुतो न भवतीत्यत आह । **विलक्षणेति** ।। तथा च तादृशपरिष्कारः बिलक्षणजनकतासद्भावे भवेदपि । एतन्मते च स न भवेदित्यर्थः । अत्रापि क्षतिविरहादित्यन्तो हेतुः ।

**उक्तातिप्रसंगः** नित्यो ज्ञानादित्यादौ अनुभवपदोपादाने स्वातन्त्र्येण तद्धेतुता नास्तीति नोच्यते । द्वितीयसंशयस्य साधारणधर्मवद्धर्मिविषयकत्वप्रदर्शनं च तत्प्रयुक्तवैरल्यशङ्काव्युदासाय ।। एवंचेति । साधारणादीनां ताद्रूप्येण वस्त्वन्तरभ्रमात्संदेहसंभवेपि प्रमीयसाधारणत्वावच्छिन्नप्रकारतायां स्वरूपसंबन्धरूपावच्छेदकत्वाल्लक्षणसमन्वयः यत्किञ्चित्वनिवेशनप्रयोजनं प्रागुक्तं स्मर्तव्यम् ।।

अथ द्रव्यं विशिष्टसत्वादित्यादौ समवायसंबन्धेन द्रव्यत्वतदभावसाहचर्येण गृहीताया विशिष्टसत्ताया विशिष्टसत्तात्वविशिष्टनिरूपितसमवायसंबन्धेन पक्षधर्मताज्ञानात्संशयप्रसङ्गः हेतुतावच्छेदकोपलक्षितव्याप्तिविषयकपक्षे तद्विशिष्टवैशिष्ट्यज्ञानादनुमितिवदिति चेन्न; सामान्यरूपेण सामान्यसंबन्धेन वा व्याप्तिग्रहे सामान्यघटितेन विशेषरूपेण विशेषसंबन्धेन वा पक्षधर्मताज्ञानादनुमितिर्युज्यते । हेतोस्तत्संबन्धस्य वा सङ्कोचे व्याप्तेरव्याघातात् सामान्यरूपेण सामान्यसंबन्धेन वा सहचारग्रहे विशेषरूपेण विशेषसंबन्धेन वा पक्षधर्मताज्ञाने न संशयःसङ्कोचस्य साधारण्यव्याघातकत्वात् । अन्यथा वह्नित्वादिना धूमतदभावादिसहचारग्रहे आर्द्रेन्धनप्रभववह्नित्वादिना संयोगसामान्येन वह्न्यादौ धूमतदभावादिसहचारग्रहे महानसानुयोगिकसंयोगेन वा पक्षधर्मताज्ञानात् धूमादिसंशयप्रसङ्गात् ।।

**विनिगमनेति** । स्वसामानाधिकरण्यस्वप्रकारतावच्छेदकावच्छिन्नविशेष्यतावच्छेदकत्वोभयसंबन्धेन धर्मिज्ञानविशिष्ट-अनुद्बुद्धसंस्कारान्यसाधारण्यादिप्रकारकत्वेन विनिगमनाविरहः धूमवान् वह्नेरित्यादौ संयोगसंबन्धावच्छिन्नवह्निनिष्ठप्रकारतावच्छेदतापर्याप्त्यधिकरणवह्नित्वमादाय लक्षणसमन्वयादाह—**शुद्धधूमत्वादीति** ।।

अथ धूमधूमाभावसहचरितवह्निमानिति ज्ञानस्योक्तरूपेण संशयजनकतया साहचर्यावच्छिन्नप्रकारतायास्तदवच्छेदकतया व्याख्यातलक्षणसङ्गतेः कुतस्तदुपेक्षा यद्धर्मस्य किंचिद्धर्मवति विशेषणतापन्नत्वोपादानेन शुद्धधूमत्वमादायातिव्याप्तेरप्यसंभवात् इति चेन्न; प्रमेयत्वादिविशिष्टव्यभिचारवारणाय यद्रूपावच्छिन्नप्रकारतात्वेनावश्यनिवेश्यतयाऽसंभवात् प्रमेयत्वादिना ऊर्ध्वत्वज्ञानवारणाय -**उर्ध्वत्वादिनेति** ।



**यद्रूपप्रकारकत्वेनेति** तृतीयार्थःस्वरूपसंबन्धरूपावच्छेदकत्वं धूमवान् वह्नेरित्यादौ यत्किंचित्संशयजनकताच्छेदकं यन्निरुक्तविशिष्टत्वं प्रकारनिष्ठतदवच्छेदकतायां निरूपकतासंबन्धेनावच्छेदिका या प्रकारता तत्पर्याप्त्यधिकरणसाधारण्यमादाय लक्षणसङ्गतिः । व्याप्यसंशयस्य साधारणान्तर्भावमते वैशिष्ट्यस्य जनकतावच्छेदकतया व्याप्येऽतिप्रसङ्ग इति यद्यद्वैशिष्ट्यं विवक्षणीयम् । तथाचासंभववारणाय यत्किंचित्वमुक्तम् । तस्य पृथक्हेतुत्वे कोटिद्वयसाहचर्यावच्छिन्नसंस्कारादेरेव हेतुघटकतया तत्र वैशिष्ट्यस्यानवच्छेदकत्वान्नातिव्याप्तिरिति वीप्सावैयर्थ्यात् यत्किञ्चित्त्वं हेयम् । **यद्रूपावच्छिन्नविषय**कविशिष्टत्वेनेति पाठान्तरम् । यद्विषयकविशिष्टत्वोक्तौ वह्निमान् धूमादित्यादौ धूमो वह्नितदभावसमानाधिकरणो धूमवांश्चायमिति ज्ञानीयतादृशविषयतापर्याप्त्यधिकरणत्वमादायातिव्याप्तिवारणाय **यद्रूपावच्छिन्नेति** ।। तथाविधविषयतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वमित्यर्थः ।

लाघवादाह—**यत्किञ्चिदिति** । यत्किञ्चित्संशयजनकतावच्छेदकं स्वविशेष्यतावच्छेदकावच्छिन्नप्रकारकत्वं तन्निष्ठावच्छेदकतावच्छेदिका या तद्घटकविशेष्यता तन्निरूपितप्रकारतापर्याप्त्यधिकरणं साधारण्यादीति लक्षणसङ्गतिः । यत्किञ्चित्त्वप्रयोजनं प्रकारतावीप्सया । **एतेनेति** । व्याप्यतया ग्रहतुल्यत्वं च व्यावृत्तत्वेन ग्रह इति नेवार्थासङ्गतिः । संशयःप्रत्यक्षात्मकः । सिद्धान्ते **रत्नकोशकारमतस्य** निराकरणीयत्वात् ।। **जनकतयेति** । अप्रामाण्यज्ञानास्कन्दितस्यापत्तावेव हेतुत्वात् ।

ननु सधर्मितावच्छेदकसाध्यादिमत्तानिश्चयेत्यत एव निर्वाहे रूपैक्यं किमर्थमित्यत आह–**घटत्वादिनेति** । **केवलान्वयिसर्वत्वं** वस्तुत्वव्यापकसर्वत्वं चैकमेव । साध्यसन्देहाविरोधितादृशसर्वत्वसामानाधिकरण्येन विधेयबोधव्यवच्छेदायैवकारः । द्वितीयस्तु तादृशबोधस्यापि तथाविधाकारत्वे प्रकृते स एव विवक्षित इत्याशङ्कावारणायाह–**साध्यसन्देहविरोधिन इति** । प्राचां मतेन वक्ष्यमाणरीत्या–**सामान्यधर्मेति** । केवलान्वयिभिन्नसामान्यधर्मः प्रकृतसाध्यव्याप्यवत्त्वम् । ननु द्वितीयेत्यादिलिखितासङ्गतिः प्रथमपक्षोक्तप्रथमदोषो वार्यते द्वितीयस्तु तत्तद्व्यक्तित्वात्मकत्वाविवक्षणे वेत्याह-**यथाश्रुतेऽपीति** । अपिना तत्तद्व्यक्तित्वरूपधर्मितावच्छेदकविवक्षापक्षसमुच्चयः । पक्षे सधर्मितावच्छेकदकसाध्यवत्तानिश्चयेऽतिव्याप्त्यनवकाशाद्दीधितौ विना तमतिव्याप्तिहेत्वात्मकमुक्तम् । तत्र तत्र पक्षे साध्यवत्तानिश्चयसामान्यासत्वेपि अतिव्याप्ति-

संभवात्। **विशेष्येति** ॥ किमर्थमित्याकाङ्क्षामर्थाभिधानपूर्वकं निरस्यति—**विशेष्येत्यादि** । द्रव्यप्रत्यक्षात्मकव्याप्तिनिश्चये साध्यसन्निकर्षदशायां तद्धर्मितावच्छेदकसन्निकर्षसंभवात्तद्भानं दुर्वारमिति दीधितौ **शब्दादिने**त्युक्तम् ॥

**सामान्यत इति ।** एतच्च निश्चयविशेषणं सामान्यं च निर्धर्मितावच्छेदकसाधारणसाध्यनिश्चयत्वं, यद्वा एतत्पक्षविशेषणं किंचिद्रूपावच्छिन्ने इत्यर्थः । एतेन व्याप्तिभानेऽधिकरणत्वावच्छिन्नसाध्यभानात्तदवच्छिन्नव्यावृत्तत्वासत्त्वात्कथमतिव्याप्तिरित्याशङ्क्य येन रूपेणेत्येतत् अधिकरणत्वादिभिन्नत्वेन विशेषणीयम्। अन्यथा अधिकरणं साध्यवदधिकरणवृत्ति हेतुरिति ज्ञानदशायामसाधारणाव्याप्तिरिति प्रत्युक्तम् । एवं पक्षे साध्यनिश्चयादलक्ष्यत्वाभावेन कथमतिव्याप्तिरिति प्रत्युक्तम् । एतद्विशिष्यपदम् । तथा च शब्दादिना साध्याव्याप्यत्वनिश्चये स नापेक्षित इति भावः ॥

विशिष्येत्युक्तास्वरसार्थमाह—**अथवेति** ॥ विशेषधर्मः तत्तद्व्यक्तित्वम् । न्यूनताभङ्गरूपं तत्प्रयोजनमाह । **उक्तविवक्षणे** तत्तद्व्यक्तित्वरूपधर्मितावच्छेदक विवक्षणे । **सामान्यधर्ममिति ।** तथा च शब्दत्वमनित्यत्वव्याप्यमिति प्रकृतसाध्यव्याप्तिग्रहदशायां सर्वाणि साध्यव्याप्यवन्ति साध्यवन्ति इत्याकारकनिश्चये यद्यद्व्यक्तित्वं धर्मितावच्छेदकीकृत्य साध्यादिमत्तानिश्चयस्तत्तद्व्यक्तित्वावच्छिन्नतत्तद्व्यावृत्तत्वसद्भावेनासाधारण्यापत्तिरित्यर्थः । **तदविशेषितस्यैवेति** ॥ एवकारेण तद्विशेषितस्य संशयप्रयोजकत्वे लक्षणे विषयतापर्याप्तिनिवेशादेवादोषात्सामान्यलक्षणविशेषणं व्यर्थं इत्याशङ्कानिरासः ॥

अथात्र पक्षे साध्यादिमत्तानिश्चयदशायां तत्र तत्संशयसत्त्वे असाधारण्यनिर्वाहकसाध्यादिमत्तानिश्चयविषयघटगगनादिव्यावृत्तत्वमादायातिव्याप्तिर्दुर्वारैवेति चेत्—**अत्र केचित्** । साधारण्याभावविशिष्टव्यावृत्तत्वज्ञानाभावविशिष्टसाध्यादिमत्तानिश्चयाभाववैशिष्ट्येन तादृशधर्मो विशेषणीयः । व्यावृत्तत्वज्ञानाभावे स्वीयाभावविषयतानिरूपिताधेयताविषयतानिरूपिताधिकरणताविषयतावच्छेदकावच्छिन्नविशेष्यताकत्वसंबन्धावच्छिन्नप्रतियोगिताको निवेशनीयः । एवं च यदा पक्षे साध्यादिमत्तानिश्चयः तदा तादृशसंबन्धेन व्यावृत्तत्वज्ञानाभावविशिष्ट एव साध्यादिनिश्चय इति न तदातिव्याप्तिः । एवं यदा कुत्रचिदपि साध्यादिमत्तानिश्चयो नास्ति तदा तादृशापत्तिवारणाय साधारण्याभावविशिष्टकिंचिद्धर्मिकसाधनादिमत्तानिश्चयाभावाभावविशिष्टसाध्यादि-



निश्चयविषयधर्मिव्यावृत्तत्वरूपासाधारण्यपरिष्कारदूषणं चाभिहितं चेत्यादिना भविष्यतीति वोध्यम् । **धूमादाविति ।** व्यभिचारपदार्थे यत्किञ्चित्संशयजनकतावच्छेदकप्रकारतासाधारण्याभावविशिष्टव्याप्तिग्रहाभावश्च प्रतियोगिनि व्याप्तिग्रहे अमुकं प्रतीत्यस्यान्वयः । **यथाश्रुतेति ।** तद्भ्रमाभावोपपादनार्थमेतद्दूषणं प्रदर्शितम् । **तदानीमसाधारण्याभावेऽपीति ।** असाधारण्यानुपगमेऽपीत्यर्थः । तथाचाव्याप्तिर्नास्ति । तदानीं असाधारण्यलक्ष्यताया एवानङ्गीकारादिति भावः । तर्हि कथमनुमितिप्रतिबन्ध इत्यत आह—**तद्भ्रमादेवेति ।**

ननु तदानीमित्यस्य साध्यव्याप्यवत्त्वेन साध्यवत्तानिश्चयदशायामित्यर्थो न युक्तः तदुपादानवैयर्थ्यात् शब्दत्ववति साध्यव्याप्यवत्तानिश्चयेनानित्यत्वव्याप्यवत्ताव्यावृत्तं शब्दत्वमिति ज्ञानमात्रस्यैवासंभवात् निश्चयोपादानवैयर्थ्याच्चेत्यत आह—**तदानीमिति ।** तत्र साध्यव्याप्यवत्त्वेन साध्यवत्तानिश्चयस्य पक्षे साध्यतद्व्याप्यवत्तासंशयौ प्रत्यविरोधित्वादिति भावः । **औचित्येति ।** तद्व्याप्यवत्तासंशये व्यापकाभाववत्तानिर्णयरूपप्रतिबन्धकापसारकत्वादनित्यत्वसंशयस्येति भावः ॥

**विरोधपदार्थमिति** ॥ नित्यः शब्दःशब्दत्वादित्यादौ शब्दत्ववत्ताज्ञानसहितस्य शब्दत्वं नित्यत्वासमानाधिकरणमित्यादिज्ञानस्य सधर्मितावच्छेदकहेतुमत्तानिश्चयकालीनयद्रूपावच्छिन्नविषयकनिश्चयसामान्यान्तर्गतस्य तादृशसाध्यानुमितिसामान्यप्रतिबन्धकतया व्याप्तिग्रहविरोधितया वा विरोधेऽतिव्याप्तिः । साध्यव्यभिचारविशिष्टसाधनसामानाधिकरण्याभावस्य संग्रहाय साध्यसामानाधिकरण्यघटिताया एव व्याप्तेरावश्यकत्वात् । अतो विरोधपदार्थनिवेशः । आदिना स्थाणुत्वं पुरुषावृत्तीति ज्ञानमिव पुरुषत्वं स्थाण्ववृत्तीति स्थाणुत्वज्ञानकालीनस्यानुमितिसामान्यविरोधित्वाद्व्याप्तिग्रहविरोधित्वाद्वा हेत्वसामानाधिकरण्यपरिग्रहः ।

पूर्वपक्षोक्तां द्वितीयरीतिं निराकृत्य प्रथमरीतिमपि निराकरोति—**विशेषणान्तरमिति** ॥ पक्षे साध्यहेतुग्रहाविरोधित्वमित्यर्थः ॥ ज्ञायते इत्यन्तस्य सधर्मितावच्छेदकहेतुमत्ताज्ञानकालीनत्वमर्थः । तच्च विरोधिताघटकज्ञानविशेषणम् ॥ यद्यदित्यनुक्तौ यदित्युक्तौ किञ्चिद्धर्मावच्छिन्नविशेष्यकत्वलाभे बाधादावतिव्याप्तिः । अतोऽवच्छेदकताप्रभृत्येव निवेश्या न धर्मस्येति सूचनाय—**यद्यदिति** वीप्सेत्यभिप्रेत्याह—**धर्मितेति** ॥ **प्रथमं कालीनान्तं निश्चयविशेषणमिति** ॥

**अथेदं** न सङ्गच्छते वह्निमान् अभावादित्यादौ वह्न्यभाववद्वृत्त्यभावरूपव्यभिचारशरीरे अधिकरणतायामभावरूपहेतोः प्रवेशेन तन्निश्चयसमानकालीनहेतुमत्तानिश्चयप्रसिद्धेः। व्यभिचारघटकतया अभावेनैव रूपेण धर्मिप्रवेशेपि वह्निसाध्यकाधेयत्वहेतुकस्थले वह्न्यभाववद्वृत्त्याधेयतात्मकव्यभिचारनिश्चयसामान्यस्य संयोगेन वह्न्यादेस्साध्यत्वे प्रतियोगितासम्बन्धेन तस्यैव हेतुत्वे प्रतियोगितासम्बन्धेन वह्निविशिष्टाभाववद्वृत्तिवह्निरूपव्यभिचारनिश्चयसामान्यस्य च स्वात्मकस्याधेयतात्वावच्छिन्नविशेषणतावच्छिन्नवह्न्यभाववद्वृत्तित्वघटकवृत्तित्वात्मकहेतुमत्तानिश्चयस्य अभावत्वावच्छिन्नविशेषणतापन्नवह्न्यभाववद्वृत्तित्वघटकवह्निरूपहेतुमत्तानिश्चयस्य च समानकालीनस्य प्रसिद्ध्या तत्र लक्षणसमन्वयेनासम्भवासम्भवात् ।

**यत्तु** साध्यव्यापकीभूताभावप्रतियोगी हेतुर्हेतुमांश्च ह्रद इति ज्ञानस्य तादृशनिश्चयसामान्यान्तर्गतस्य हेतुमान् जातिमानिति ज्ञानविशिष्टस्य साध्यव्यापकीभूताभावप्रतियोगी हेतुरिति ज्ञानस्य स्वसमानकालीनहेतुमत्ताज्ञानधर्मितावच्छेदकं यद्धर्मत्वावगाहित्वेन स्वरूपतो वा तद्धर्मितावच्छेककसाध्यानुमितिसामान्यविरोधितया असाधारण्याव्याप्तिवारणाय सधर्मितावच्छेदकेत्यत्र स्वसमानकालीनहेतुमत्ताज्ञानसमानधर्मितावच्छेदकेत्यत्र चावच्छेदकत्वं निरवच्छिन्नं निवेश्यम्। एवं चाधेयतात्वस्य स्वरूपतो भानासम्भवेन पूर्वोक्तवह्न्यभाववद्वृत्त्याधेयतात्मकव्यभिचारनिश्चयस्य स्वसमानकालीनस्वात्मकहेतुमत्ताज्ञानप्रसिद्धावपि निरवच्छिन्नधर्मितावच्छेदकताकहेतुमत्ताज्ञानाप्रसिद्ध्याऽसम्भवसौलभ्यमेवेति ॥ **तत्तुच्छम्** ॥ अखण्डोपाधिरूपाधेयतात्वअभावत्वादेः स्वरूपतो भानस्य सिद्धान्तसिद्धत्वात। सामान्यतो हेतुमत्ताज्ञानाप्रसिद्ध्याऽसम्भवपरग्रन्थस्यासङ्गतितादवस्थ्याच्च । स्वसमानकालीनहेतुमत्ताज्ञानधर्मितावच्छेदकनिष्ठनिरवच्छिन्नावच्छेदकत्वाप्रसिद्धेरित्यस्यापि वक्तव्यत्वापातादिति चेत् ॥

**अत्र केचित्** ॥ एतल्लक्षणघटककालत्वस्य दीर्घकालसाधारण्येऽसाधारण्येऽव्याप्तिः क्षणत्वं चाननुगतत्वेन गौरवेण च न निवेशयितुं शक्यम्। अतः सधर्मितावच्छेदककहेतुमत्ताज्ञानकालीनेत्यस्य स्वाधिकरणत्व - स्वसामानाधिकरण्य · स्ववृत्तिध्वंसप्रतियोगित्वैतत्त्रितयसम्बन्धेन सधर्मितावच्छेदककहेतुमत्ताज्ञानविशिष्टेत्यर्थः। स्वसमानकालीनेत्यत्र स्वाधिकरणत्व - स्वसामानाधिकरण्य - स्वप्रतियोगिकध्वंसवत्त्वैतत्त्रितयसम्बन्धेन स्वविशिष्टेत्यर्थः । सधर्मितावच्छेदककहेतुमत्ताज्ञानविशिष्टयादृशविशिष्टविषयक-निश्चयसामान्यं स्वविशिष्टहेतुमत्ताज्ञानधर्मितावच्छेदककप्रकृतानुमितित्वव्याप-



कप्रतिबध्यतानिरूपितप्रतिबन्धकतावत् तादृशत्वं सव्यभिचारत्वमिति फलितम्। तत्र प्रथमकालीनान्तत्यागे स्वतन्त्रहेतुमत्ताज्ञानाकालीनस्य वह्न्यभाववद्वृत्त्याधेयत्वात्मकपूर्वोक्तव्यभिचारनिश्चयस्य स्वयं हेतुमत्ताज्ञानत्वेपि स्वप्रतियोगिकध्वंसवत्वस्वसामानाधिकरण्यस्वाधिकरणत्वैतत्त्रितयसंबन्धेन स्वविशिष्टहेतुमत्ताज्ञानाप्रसिद्ध्याऽसंभवः सम्भवत्येवेति नानुपपत्तिलेशोऽपीति ।

**अत्रेदं तत्वम्** ॥ स्वप्रतियोगिकध्वंसवत्त्वरूपतृतीयसंबन्धोपादानस्य किं प्रयोजनं? एतत्क्षेत्रं एतदङ्कुराभाववदेतदङ्कुरादित्यादौ पक्षभिन्ने हेतुमत्तानिश्चयाप्रसिद्धिस्थले बाधनिश्चयस्यैव हेतुमत्तानिश्चयरूपतया बाधेऽतिव्याप्तिवारणमिति चेत; यत्र विषयविशेषे बाधनिश्चयोत्तरं हेतुमत्तानिश्चयः पक्षभिन्ने हेतुमत्तानिश्चयोऽप्रसिद्धः तत्र बाधातिव्याप्तेः कथं वारणं स्यात? यत्र हेतुमत्तानिश्चयभिन्नोऽसाधारण्यनिश्चयोऽप्रसिद्धः तत्र यथाश्रुतेऽसाधारण्यासत्वादव्याप्तेश्च प्रसङ्गात्। तस्मादत्र तृतीयसंबन्धप्रदर्शनम्। हेतुमत्तानिश्चयासाधारण्यनिश्चययोरौत्सर्गिकमयौगपद्यमाश्रित्याप्रसिद्ध्यभिधानमपि तथैवेति ।

**एतेन** निर्धर्मितावच्छेदककेति ग्रन्थेनाप्रसिद्ध्यभिधानं व्यर्थं अभावो गगनत्ववानाधेयत्वादित्यादौ गगनत्वव्यापकीभूताभावप्रतियोगित्वरूपासाधारण्ये लक्षणासङ्गतेः तज्ज्ञानस्य व्यापकताघटकतया अभावत्वं धर्मितावच्छेदकीकृत्याधेयत्वावगाहिस्वसमानकालीनस्वात्मकहेतुमत्तानिश्चयधर्मितावच्छेदकाभावत्वावच्छिन्नधर्मिकानुमितिसामान्यविरोधित्वात्। न च तादृशनिश्चयस्य ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकतया तद्विषयविशिष्टस्य विशिष्टद्वयघटितत्वान्न हेत्वाभासत्वमिति वाच्यम्। लाघवेन तत्र वैशिष्ट्यानवच्छिन्नप्रतिबन्धकताया एवोपगमादिति **प्रत्युक्तम्** । स्ववृत्तिध्वंसप्रतियोगित्वस्य तृतीयसंसर्गत्वेनोक्ताप्रसिद्धिसामञ्जस्यात ॥

वस्तुतस्तु तदपि वा नोपादेयमित्यादिना व्यापकत्वे भावत्वानिवेशस्य दर्शितत्वादिह केवलासाधारण्यविषयकज्ञानस्याभावत्वं धर्मितावच्छेदकीकृत्याधेयतारूपहेत्ववगाहित्वमेव नास्तीत्याशङ्काया एव नावतारः॥ अथ दोषविषयकनिश्चये सधर्मितावच्छेदककहेतुमत्तावगाहित्वमेव निवेश्यं न तु तादृशनिश्चयकालीनत्वमिति चेन्न। तथासति वह्निसाध्यकवह्निव्यापकीभूताभावप्रतियोगित्वव्याप्यवज्जलहेतुकवह्निव्यापकीभूताभावप्रतियोगिजलात्मकासाधारण्येऽव्याप्तिवारणाय तादृशकालीनत्वस्यावश्यकत्वात दोषनिश्चयोत्तरं तादृशहेतुमत्तानिश्चयसंभवात् ।

अथ वह्न्यभावादिधर्मितावच्छेदकजलवत्ताज्ञानसहितवह्निव्यापकीभूताभावप्रतियोगिजलविषयकनिश्चयस्यापि तादृशनिश्चयसामान्यान्तर्गतस्य स्वसमानकालीनहेतुमत्ताज्ञानधर्मितावच्छेदककवह्न्यभावाद्यवच्छिन्नवह्न्यादिविधेयकानुमितेरप्रसिद्ध्याऽव्याप्तिः। न च हेतुमत्ताग्रहधर्मितावच्छेदकतायां प्रकृतानुमितिधर्मितावच्छेदकतायां च पूर्वोक्तयुक्त्या निरवच्छिन्नत्वनिवेशान्न वह्न्यभावादिधर्मितावच्छेदककज्ञानस्य लक्षणाघटकतया देष इति वाच्यम्। द्रव्यत्वाभाववान् धूमात् द्रव्यभिन्नं गुणादित्यादौ द्रव्यत्वाभावव्यापकीभूताभावप्रतियोगिधूमात्मकेऽसाधारण्ये तथाप्यव्याप्तेः द्रव्यं धूमवदित्यादिनिरवच्छिन्नसधर्मितावच्छेदककनिश्चयकालीनस्योक्तासाधारण्यनिश्चयस्यसमानकालीन हेतुमत्ताज्ञानधर्मितावच्छेदकीभूतद्रव्यत्वावच्छिन्नधर्मिकद्रव्यत्वाभावादिरूपसाध्यविधेयकानुमितेरप्रसिद्धेरिति।

यत्तु सधर्मितावच्छेदककेत्यत्र धर्मितावच्छेदकमनाहार्यज्ञानीयसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकत्वेन विशेष्यमिति तदशुद्धमेव। उक्तस्थले द्रव्यत्वस्य जातिमान् द्रव्यभिन्न इति ज्ञानमादयानाहार्यसाधनसाध्यवत्ताज्ञानधर्मितावच्छेदकत्वात्, निरवच्छिन्नावच्छेदकतानिवेशे महागौरवादिति चेन्न; हेतुमत्ताज्ञानधर्मितावच्छेदकस्य साध्यतावच्छेदकावच्छिन्नघटकतानवच्छेदकत्वेनापि विशेषणीयतयैव वारणात्।

ननु शब्दत्वं नित्यत्वव्यापकीभूताभावप्रतियोगिशब्दत्ववत् घटशब्दश्च तथेति समूहालम्बनज्ञानं असाधारण्यविषयकपक्षधर्मताज्ञानोत्तरं वा पक्षधर्मताज्ञानान्तरं यत्र तत्रत्यासाधारण्यविषयकनिश्चयकालीनहेतुमत्ताज्ञानधर्मिताच्छेदकानुमितित्वस्य शब्दपक्षकायां घटपक्षकायां चानुमितौ सत्वेनैकस्या अपि प्रतिवध्यतायास्तादृशानुमितित्वाव्यापकत्वमिति चेत्। **अत्र प्राञ्चः**। स्वसमानकालीनहेतुमत्ताज्ञानधर्मितावच्छेदककानुमितित्वव्यापकतावच्छेदकस्वनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यताकसधर्मितावच्छेदकहेतुमत्तानिश्चयकालीनयादृशविशिष्टविषयकनिश्चयसामान्यं तादृशविशिष्टो व्यभिचार इति विवक्षणीया। प्रथमकालीनान्तं चाव्याप्तिवारकं असंभवपदस्य यादृशदोषनिश्चयस्य हेतुमत्तानिश्चयकालीनत्वानियमस्तादृशदोषेऽसंभव इति रीत्याऽव्याप्तिपरत्वादित्याहुः।

तच्चिन्त्यम्। प्रतिबन्धकतात्वप्रतिबध्यतात्वयोः अवच्छेदकभेदभिन्नतयाऽनुगमासंभवात्। केचित्तु स्वसमानकालीनहेतुमत्ताज्ञानधर्मितावच्छेदकीभूतयद्यद्धर्मावच्छिन्नविशेष्यताकतादृशानुमितित्वव्यापकतत्तद्धर्मावच्छिन्नविशेष्यताकहेतुमत्तानिश्चयविशिष्टनिष्ठत्वावच्छिन्नविषयताशालिनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यताकत्वसमुदायवद्धर्मावच्छिन्नत्वविवक्षणान्नोक्तरीत्या व्यापकत्वानुपपत्तिः। भूतान्तं स्वरूपकीर्तनम्। यद्वा सधर्मितावच्छेदकहेतुमत्तानिश्चयकालीनयद्रूपावच्छिन्नविषयकनिश्चयसामान्यं स्वसमानकालीनहेतुमत्ताज्ञानधर्मितावच्छेदकीभूतकिंचिद्धर्मावच्छिन्नविशेष्यकानुमितिसामान्यवृत्तिप्रतिबध्यताकमिति विवक्षितम्। हेतुतावच्छेदकपर्याप्तावच्छेदकताकप्रकारत्वमुपादेयम्। तेन जलं वह्निव्यापकीभूताभावप्रतियोगि जातिमत्वान् ह्रद इति ज्ञानमादाय न दोषः। विशेष्यतावच्छेदकताद्वयं निरववच्छेन्नं विशेष्यम्। तेन जातिमान् जलवान् इति निश्चयसमानधर्मितावच्छेदकक ह्रदो वह्निमानित्याद्यनुमितौ ह्रदो जलवानिति निश्चयसमानधर्मितावच्छेदकजातिमान् वह्निमानित्यनुमितौ च न व्यापकताभङ्गः। हेतुमत्तानिश्चयश्चावच्छेदकावच्छेदेन निवेश्यः, तेन सामानाधिकरण्येन हेतुमत्तानिश्चयविशिष्टसाधारण्यनिश्चयस्य सामानाधिकरण्येनानुमित्यविरोधित्वेऽपि नाव्याप्तिः।



एतेन संयोगेन वह्नेः साध्यत्वे प्रतियोगितासंबन्धेन वह्नेर्हेतुत्वे वह्न्यभाववद्वृत्तित्वविशिष्टवह्निरूपव्यभिचारे स्वसमानकालीनस्वात्मकवह्न्यात्मकहेतुमत्तानिश्चयप्रसिद्धेः वह्निमानाधेयत्वादित्यादावपि वह्न्यभाववद्वृत्तित्वविशिष्टवृत्तित्वरूपव्यभिचारेऽपि तथाविधाधेयतात्मकहेतुमत्तानिश्चयप्रसिद्धेश्च तदप्रसिद्ध्यभिधानमशुद्धमिति पूर्वपक्षोऽप्यपास्तः। सामानाधिकरण्येन हेतुतावच्छेदकावच्छिन्नप्रकारकनिश्चयप्रसिद्धावपि अवच्छेदेन हेतुतावच्छेदकापर्याप्तावच्छेदकताकहेतुमत्तानिश्चयाप्रसिद्धेः जागरूकत्वात्।

अथैवमपि यत्र ह्रदे ह्रदत्वावच्छेदेन जलघटितो जलवद्ध्रदकालीनवह्निः साध्यो जलं हेतुः तत्र तादृशजलवद्ध्रदकालीनवह्निव्यापकीभूताभावप्रतियोगिजलात्मकासाधारण्यनिश्चयरूपावच्छेदकावच्छेदेन हेतुनिश्चयः प्रसिद्ध इति तदभिधानमसङ्गतम्। यदि च तादृशवह्निव्यापकत्वमप्रसिद्धं गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वात् अतस्तत्र वह्निव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यमिति तत्रासङ्गतमित्युच्यते तदापि यत्र सामानाधिकरण्यसम्बन्धेन जन्यगुणविशिष्टपरिमाणं परिमाणत्वावच्छेदेन जन्यगुणाघटितम् समवायसम्बन्धेन साध्यं सामानाधिकरण्यसम्बन्धेन जन्यगुणो हेतुः तत्र प्रलयावच्छेदेन जन्यगुणविशिष्टपरिमाणाभावः परिमाणाभावादन्यो यस्तद्वृत्ति जन्यगुणरूपव्यभिचारग्रह एवावच्छेदकावच्छेदेन हेतुविषयकस्तस्य जन्यगुणाभावात्

अनन्यत्वे तु अवच्छेदकावच्छेदेनानुमितिरेव निवेश्यते । द्वेधा निविष्टहेतुमत्तानिश्चयस्य तथानिवेशमपेक्ष्य लाघवात् । तावता सामानाधिकरण्येन हेतुमत्ताज्ञानविशिष्टज्ञानकासाधारण्यसंग्रहसम्भवात् । तथा च सम्योगेन वह्नेः साध्यत्वे प्रतियोगितासंबन्धेन तस्यैव हेतुत्वे च लक्षणं सुसमन्वयमेव ॥

अथवा वह्नित्वावच्छेदेन प्रमेयत्वघटितं प्रमेयवह्निप्रतियोगिकविषयत्वं साध्यं प्रमेयत्वं हेतुस्तत्र प्रयेयत्वविशिष्टवह्न्यविषयकवृत्तिप्रमेयत्वात्मकव्यभिचारे लक्षणसङ्गतिः वह्नित्वसमानाधिकरण्येन प्रमेयत्वघटितप्रमेयवह्निविषयत्कत्वस्य प्रतियोगितानवच्छेदकत्वात् सामानाधिकरण्येन प्रमेयत्वावगाहि प्रमेयवह्निरिति ज्ञाने तदभावसत्वादिति ॥

**अत्रोच्यते । प्रथमकल्पे** वह्निः प्रमेयत्वविशिष्टवह्न्यभाववान् प्रमेयत्वादित्यादौ वह्नित्वावच्छेदेन प्रमेयत्वघटितसाध्ये परिमाणं जन्यगुणविशिष्टपरिमाणवत् जन्यगुणादित्यादौ परिमाणत्वावच्छेदेन जन्यगुणघटितसाध्ये च बाधेऽतिव्याप्तिः तन्निश्चयस्य वह्नित्वावच्छेदेन हेतुमत्तानिश्चयतया स्वसमानकालीननिश्चयीयहेतुप्रकारतानिरूपितविशेष्यतावच्छेदकीभूततादृशयत्किञ्चिद्धर्मावच्छिन्नविशेष्यकसाध्यानुमितिसामान्यविरोधित्वात् ॥ **द्वितीयकल्पे** अभावो वह्निमान्वह्नेरित्यादौ प्रतियोगितासंबन्धेन हेतौ बाधेऽतिव्याप्तिरतः स्वसमानकालीननिश्चयः स्वभिन्नत्वेन विशेषणीयः । तथाच स्वसमानकालीनस्वभिन्नहेतुमत्तानिश्चयाप्रसिद्धिसङ्गतिः ॥ प्रथमहेतुमत्तानिश्चयेऽपि स्वभिन्नत्वं देयं, अन्यथा दोषविषयकस्य समूहालंबनस्य सामान्यान्तर्गतत्वात् स्वभिन्नस्वसमानकालीनहेतुमत्तानिश्चयाप्रसिद्ध्याऽसंभवापत्तेः ॥ एवंच प्रथमकालीनान्तमित्यादिसाधु सङ्गच्छत इत्याहुः ।

**तदेतदशुद्धमेव ।** सधर्मितावच्छेदककहेतुमत्ताज्ञानकालीनत्वानिवेशेऽपि घटः प्रमेय इति निश्चयकालीनबाधनिश्चयस्य सामान्यान्तर्गततया तथाविधानुमितिसामान्याविरोधितयैवातिव्याप्तिवारणसंभवात् । स्वभिन्नत्ववैयर्थ्यात् ।

**यत्तूक्त**बाधवारणाय स्वसमानकालीनहेतुमत्तानिश्चयीयमुख्यविशेष्यतावच्छेदकत्वेन धर्मो निवेश्यः । नचैवमपि वह्निः प्रमेयत्ववद्वह्न्यभाववानित्यादौ वह्निनिष्ठप्रमेयत्ववद्वह्निरूपबाधेऽतिव्याप्तिः, तन्निश्चयस्य स्वसमानकालीनहेतुमत्तानिश्चयीयमुख्यविशेष्यतावच्छेदकीभूतवह्नित्वावच्छिन्नविशेष्यकानुमितिसामान्यविरोधित्वादिति वाच्यम् ॥ मुख्यत्वं ह्यत्र प्रकारतानवच्छिन्नत्वे सति विशेष्यत्वानवच्छिन्नत्वं उक्तबाधज्ञाने च प्रमेयत्वरूपहेतुप्रकारतानिरूपितविशेष्यताया वह्निनिष्ठप्रकारतानिरूपितविशेष्यत्वावच्छिन्नत्वान्न दोषः । विषयत्वानवच्छिन्नत्वं वा तत् । एवं च कालीनत्वान्तानुक्तौ केवलदोषनिश्चयसमानकालीन हेतुमत्तानिश्चयीयतादृशविशेष्यतावच्छेदकधर्माप्रसिद्धिरित्यर्थ इति **तदप्येतेन परास्तम् ।**



**अन्ये तु** उक्तरीत्या तादृशानुमितित्वव्यापकत्वाप्रसिद्धिवारणाय प्रतिबध्यतायां स्वसमानकालीनहेतुमत्तानिश्चयव्यापकानुमितित्वव्यापकत्वमुपादेयम् ॥ निरवच्छिन्नधर्मितावच्छेदकताव्याप्यत्वव्यापकत्वयोरवच्छेदकः संबन्धः । व्यापकत्वं च भेदघटितं उक्तस्थले तत्तद्धर्मावच्छिन्नविशेष्यकहेतुमत्तानिश्चयव्यापिका तत्तद्धर्मावच्छिन्नविशेष्यकसमूहालंबनानुमितिः । एवं च मेयत्वहेतुकवह्निपक्षकप्रमेयत्ववद्वह्न्यभावसाध्यकस्थलीयबाधाद्यतिव्याप्तिवारणदिशा अप्रसिद्धिसङ्गतिरित्याहुः ।

**तदपि** बाधातिव्याप्त्यसत्वादशुद्धमेव । किं च पर्वतो धूमवानिति ज्ञानविशिष्टस्य सामान्यान्तर्गतबाधनिश्चयस्य स्वपदेनोपादानात्तद्धर्मितावच्छेदकपर्वतत्वे पर्वतो वह्निमान् ह्रदो वह्निमांश्चेति समूहालंबनानुमितेस्तादृशहेतुमत्तानिश्चयव्यापकतया बाधेऽतिव्याप्तिस्तादृशनिश्चयव्यापकविधेयताकानुमितित्वव्यापकत्वनिवेशे चोक्तस्थले विधेयताभेदात् व्यापकत्वानुपपत्तिरिति ॥

**वस्तुतस्तु** धर्मितावच्छेदकद्वयावगाहिहेतुमत्ताज्ञानकालीनस्य सामान्यान्तर्गतासाधारण्यनिश्चयस्य तन्निरूपितप्रतिबध्यतायां कस्यामपि समानकालीनहेतुमत्ताज्ञानधर्मितावच्छेदककानुमितित्वव्यापकत्वासम्भवादसाधारण्येऽव्याप्तिः प्रथमहेतुमत्ताज्ञानस्य विशेष्यताद्वयशून्यत्वेन न वार्यते जलवद्ध्रदकालीनजलवान् ह्रद इति ज्ञानावारणात् । अतः सधर्मितावच्छेदकहेतुमत्ताज्ञानं हेतुतावच्छेदकावच्छिन्नप्रकारताविशिष्टान्यत्वेन विशेषणीयम् । तच्च स्वनिरूपकत्वस्वभिन्नहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपकत्वोभयसंबन्धेन हेतुतावच्छेदकावच्छिन्नप्रकारतावदन्यत्वमिति सारम् ॥

ननु ह्रदो वह्निमान् काञ्चनमयजलादित्यादौ जलं वह्निव्यापकीभूताभावप्रतियोगि ह्रदश्च काञ्चनमयवानिति काञ्चनमयात्मकहेतुमत्ताज्ञानमादायासाधारण्या-

व्याप्तिवारणाय हेतुतावच्छेदकपर्याप्तप्रकारतावच्छेदकताकत्वं विवक्षणीयं; तथाचावृत्तिमद्धूदादेर्हेतुत्वे ह्रदोऽवृत्तिर्वह्निमानित्याद्यनाहार्यहेतुमत्ताज्ञानाप्रसिद्धिरिति चेन्न, प्रथमहेतुमत्ताज्ञानस्य निश्चयविशिष्टान्यत्वेन विशेषणीयत्वात्। वैशिष्ट्यं च कालिकविशेषणतासामानाधिकरण्यस्वनिष्ठासाधारण्यविषयतावच्छिन्नप्रतिबन्धकतानवच्छेदकविषयतावत्वैतत्त्रितयसंबन्धेन। एवं चोक्तस्थले एवंभूतं हेतुमत्ताज्ञानं जलवान् ह्रद इति ज्ञानमेवेति तत्कालीननिश्चयविषयासाधारण्ये लक्षणसमन्वयः ॥ वह्निमान् जलशैवालोभयस्मादित्यादौ वह्निव्यापकीभूताभावप्रतियोगि जलं तथाविधं शैवालं चोभयमेवासाधारण्यं तत्रैकहेतुमत्तानिश्चयस्यान्यहेतुघटितासाधारण्यनिश्चयवत्तयाऽसाधारण्येऽव्याप्तिरतः कालिकविशेषणतानिवेशः। तन्निवेशे च जलघटितासाधारण्यनिश्चयासमानकालीनशैवालवत्तानिश्चयमादाय शैवालघटितासाधारण्ये लक्षणसमन्वयः। एवं जलघटितासाधारण्येऽपि स उक्तप्रथमसंबन्धद्वयेन जन्यनिश्चयमात्रस्यैव स्वात्मकनिश्चयवत्त्वाचद्वदन्यनिश्चयाप्रसिद्धेस्तदीयसंबन्धनिवेशः ॥ द्वितीयसंबन्धप्रयोजनमूह्यम्। व्यभिचारादावपि साध्यव्यापकीभूताभावप्रतियोगित्वविशिष्टहेतुमत्ताज्ञानकालीनं तज्ज्ञानमादाय लक्षणसमन्वयः।

वस्तुतस्तु हेतुतावच्छेदकावच्छिन्नप्रकारताविशिष्टान्यसधर्मितावच्छेदककहेतुमत्ताज्ञानवैशिष्ट्यघटकसंबन्धमध्ये स्वप्रकारतावच्छेदकहेतुतावच्छेदकावच्छिन्नविशेष्यकत्वरूपश्चतुर्थःसंबन्धो निवेश्यः। वह्निव्यापकीभूताभावप्रतियोगिजलं जातिमत्त्वान् ह्रद इति ज्ञानस्य वारणाय वह्निव्यापकीभूताभावप्रतियोगिजलत्वप्रकारकप्रमाविशेष्यं जलत्वप्रकारकप्रमाविशेष्यवांश्च ह्रद इति ज्ञानसंग्रहाय तद्घटकविशेष्यताप्रकारतावच्छेदकते निरवच्छिन्नत्वादिना सजातीये निवेश्ये इति न कोऽपि दोषः। नचैवमपि काञ्चनमयवत् जलं वह्निव्यापकीभूताभावप्रतियोगि काञ्चनमयश्च प्रमेय इति ज्ञानमादाय दोष इति वाच्यं, दोषघटकतावच्छेदकत्वेन हेतुतावच्छेदकस्य विशेषणीयत्वात ॥

अथ सामान्यसाध्यविधेयकानुमितित्वेन व्यापकतावदन्यव्यापकत्वार्थकतया सधर्मितावच्छेदकहेतुमत्तानिश्चयकालीनयद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापकत्वं सामान्यमित्यन्तार्थः। तथा च स्वसमानकालीनेति स्वपदेन निश्चयत्वपरामर्शे तत्कालीनत्वस्याव्यावर्तकता स्वाश्रयकालीनत्वविवक्षया तादृशदोषनिश्चयकालीननानाविधनानाधर्मिकहेतुमत्तानिश्चये तु तत्कालीनत्वसत्वेऽपि स्वाश्रयसमानकालीनहेतुमत्तानिश्चयव्यापकानुमितित्वव्यापकत्वनिवेशादसाधारण्याव्याप्तिवारणेऽपि तथाविधहेतुमत्तानिश्चयधर्मितावच्छेदकीभूतपक्षतावच्छेदकधर्ममादाय बाधादावतिव्याप्तेः ॥



**एतेन** तादात्म्यसंबन्धेन तादृशनिश्चयव्यापकत्वविवक्षया स्वपदेत यत्किञ्चिन्निश्चयमादाय लक्षणसमर्थनं परास्तम्। व्याप्यस्यानुगतरूपेण व्यापकस्य स्वत्वघटितधर्मेण निवेशे व्याप्यव्यापकभावासंभवाच्च स्वत्वस्याननुगततया तद्घटितधर्मस्य व्यापकतानवच्छेदकत्वात् ॥

**अत्र केचित्।** प्रकृतसाध्यविषयकप्रकृतहेतुधर्मिकव्याप्तिप्रकारकानुमितिविशिष्टान्यत्वानतिरिक्तवृत्तिस्वावच्छिन्नविषयताकधर्मवत्त्वं लक्षणार्थः। वैशिष्ट्यं च स्वनिष्ठभेदप्रतियोगितावच्छेदकत्वस्वीयविशिष्टसाध्यप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयकालीनत्वोभयसंबन्धेन ॥ भेदप्रतियोगितावच्छेदकत्वं च स्वनिरूपितप्रतिबध्यतासंबन्धेत। तादृशोभयसंबन्धेनानुमितिवैशिष्ट्यप्रसिद्धिर्बाधादौ भ्राह्या ॥ तदवच्छिन्नभेदस्य व्यभिचारादिनिश्चये सत्वाल्लक्षणसमन्वयः। लक्ष्यनिश्चयस्य द्वितीयसंबन्धेनानुमितिमत्त्वादसंभवोऽतः प्रथमसंबन्धनिवेशः। हेतुमत्तानिश्चयाकालीनासाधारण्यनिश्चयमादायाव्याप्तेर्द्वितीयसंबन्धनिवेश इत्याहुः ॥

**तदसत्।** सधर्मितावच्छेदककहेतुमत्तानिश्चयकालीनयद्रूपावच्छिन्नविषयकनिश्चयो यो यः स स्वसमानकालीनहेतुमत्ताज्ञानधर्मितावच्छेदकावच्छिधर्मिताकानुमितिसामान्यप्रतिबन्धक इत्युक्त्यैवोपपत्तेरीदृशकुसृष्टिवैयर्थ्यात। तादृशानुमितिसामान्यनिरूपितप्रतिबन्धकतात्वं सधर्मितावच्छेदकहेतुमत्तानिश्चयविशिष्टनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयताव्यापकतावच्छेदकमित्युक्तथैव स्वपदस्य तादृशविषयतापरत्वसंभवाच्च ॥

**अन्ये तु समादधति।** सधर्मितावच्छेदकहेतुमत्तानिश्चयकालीनयद्रूपावच्छिन्नविषयकनिश्चयसामान्यं विशिष्टसाध्यकप्रकृतहेतुधर्मिकसाध्यव्याप्त्यनुमित्यवृत्ति तद्रूपावच्छिन्नत्वं विवक्षितम् ॥ अनुमितिवृत्तित्वं च स्वसमानकालीनहेतुमत्ताज्ञानविशेष्यतावच्छेदकावच्छिविशेष्यताकत्वस्वाप्रतिबध्यत्वोभयसंबन्धेन निरुक्तानुमितिमत्त्वं वा विधेयमिति ॥

नन्वसाधारण्यज्ञानविशिष्टहेतुमत्ताज्ञानत्वेनैव प्रतिबन्धकत्वादसाधारण्यज्ञानस्य प्रतिबन्धकतैव नास्तीति कथं लक्षणसमन्वय इत्यत आह—**तथाचेति** । उक्तार्थकरणबीजमाह—**एतेनेति । प्रागुक्तयुक्त्या** स्वरूपसंबन्धरूपावच्छेदकत्वस्य पर्याप्तिनिवेशेऽसंभवः तदनिवेशे धूमो वह्निव्यापकीभूताभावप्रतियोगीति भ्रमविषयतादृशप्रतियोगित्वेऽतिव्याप्तिरित्युभयवारणानुरोधरूपयुक्त्या, यत्र यत्र विरोधिताघटकप्रतिबन्धकनिश्चयस्य तादृशसकलधर्मिकानुमितिप्रतिबन्धकत्वासंभवादिति भावः ॥ **परास्तमिति** ॥ पक्षवृत्तित्वाघटितमेवासाधारण्यं; ज्ञायते इतिपदोपसन्दानान्नानाधर्मिकहेतुमत्तानिश्चयस्य सधर्मितावच्छेदककहेतुमत्तानिश्चयत्वेनानुगतीकृतस्य विरोधिताघटकप्रतिबन्धकनिश्चयकालीनत्वलाभः । स्वकालीनदोषनिश्चयस्तु अर्थतो रूपशब्दबलाच्च लभ्यते ॥ वीप्सया च तद्धर्मितावच्छेदकावच्छिन्नधर्मिताकानुमितित्वव्यापकत्वलाभ इति बोध्यम् ।

अत्र ज्ञायत इत्यन्तेनानुमितौ प्रकृतहेतुकत्वस्य न लाभः । यत्र यत्रेत्यस्य वैयर्थ्यादिति बोध्यम् । पक्षवृत्तित्वाघटितासाधारण्यस्यासाधारण्यरूपवत्तानुपपत्तिरूपपूर्वपक्षं निराकर्तुं अन्यथैवासाधारण्यज्ञानप्रतिबन्धकतां मन्वानानां प्रकृतहेतुकानुमितिघटितलक्षण एव निर्भरिणां मतमुपन्यस्यति—**यत्त्विति । धर्मिविशेषविषयत्वाघटितमिति** । तथा च हेतुमत्ताज्ञानजन्यसकलधर्मिकानुमितेः प्रतिबध्यतानिर्वाहः । प्रयोजनाभावादप्येतदनिवेशः । तद्धर्मावच्छिन्नहेतुमत्ताज्ञानजन्यतत्तद्धर्मावच्छिन्नविशेष्यकानुमितित्वस्य प्रतिबध्यतावच्छेदकत्वोपगमे धर्मितावच्छेदकभेदेन प्रतिबन्धकताभेदापत्तेश्च । प्रतिबध्यतावच्छेदककोटौ जन्यत्वान्तनिवेशप्रयोजनमाह—**अत इति । असत्त्व इति** । तत्सत्त्वे तूक्तानुमितेरपि तद्धेतुमत्ताज्ञानजन्यत्वमेवेत्यभिमानः । पक्षवृत्तित्वघटितासाधारण्यमते च हेतुमत्ताज्ञानजन्यताया न प्रतिबध्यतावच्छेदकनिवेशस्संभवति प्रयोजनाभावात् । अत्राप्येतन्मते उदासीनविषयताकपक्षवृत्तित्वस्यासाधारण्यप्रवेशः संभवतीत्याशयेनाह—**एवंचेति** । हेत्वन्तरज्ञानजन्यानुमितौ व्यापकताभङ्गेनासाधारण्येऽव्याप्तिरतो लक्षणे प्रकृतहेतुकत्वं निवेशयति—**लक्षण इति** । यत्र यत्र हेतुमत्वं ज्ञायत इत्युपसन्दानादिति भावः ।

नन्वेतन्मते शाब्दबोधं प्रति पृथगेव प्रतिबन्धकतेत्यत आह—**अन्येति** । तस्यास्तद्धेतुमत्ताज्ञानजन्यानुमितित्वरूपप्रतिबध्यतावच्छेदकानाक्रान्तत्वादिति भावः । सामग्र्याः कार्यव्याप्यतया तादृशनिश्चयासत्वस्थलीयसामग्र्याः तादृशनिश्चयसत्वस्थले



सत्वातदन्तर्भावेनेति न तदन्तर्भावे तद्धेतुमत्तानिश्चयासत्वे तद्धर्मिकासाधारण्यनिश्चयसत्वेऽन्यलिङ्गकानुमित्यनुपपत्तेरिति भावः । **कथामात्रेणा**न्यहेतुकानुमितेस्तद्धेतुमत्ताज्ञानजन्यत्वस्वीकारमात्रेण, मात्रपदात्तद्द्वयप्रतिबन्धकत्वोपपत्तिव्यवच्छेदः ।

प्रथमदूषणत्यागप्रयोजनं स्फुटयति—**एतेनेति** । हेतुमत्ताज्ञानजन्यतानिवेशमते व्याप्यत्वानवच्छिन्नहेतुप्रकारकज्ञानस्याजनकतया शब्दधर्मिकतादृशशब्दत्ववत्ताज्ञानसत्वे शब्दत्वधर्मिकासाधारण्यनिश्चयसत्वे घटो नित्य इत्यनुमितिरुत्पद्यते । एतन्मते तु तदनुपपत्तिरतः—**समानधर्मितावच्छेदककेति** । समानपदं स्वसमानपरं स्वं अनुमितिः । दीधितिकृता साध्याभावीयान्वयव्याप्तेरनुक्तत्वात्तदलक्ष्यताभ्रमनिबन्धनातिव्याप्तिभ्रममुद्धरति—**एतन्नये इति** । ननु विरोधित्वं प्रतिबन्धकज्ञानविषयत्वं व्याख्यायते, तथा चेत्यादिकं न सङ्गच्छत इतिपदवशेन ज्ञानस्यैव लाभादित्यत आह—**इत्याकारकेत्यादि** । पदद्वये जघन्यवृत्तिभयेनाह—**अग्रिमेति । व्यभिचारो**ऽसाधारण्यं साधारण्यस्यानुमित्यविरोधित्वात् । साधारण्यमेव वा प्रकृतहेतुकत्वस्य तद्विषयकत्वरूपत्वात्—**सर्वेति** । निर्धर्मितावच्छेदकानुमितिर्नास्त्येव अन्यथा तथाविधानुमितिमादायानुमितिसामान्यविरोधित्वसत्वेनैतद्विशेषणस्याव्यावर्तकतापत्तेरिति सूचितम् ।

अथ निर्धर्मितावच्छेदककहेतुमत्ताज्ञानकालीनस्य गगनाभाववत्सर्वमिति ज्ञानस्य समानकालीनहेतुमत्ताज्ञानधर्मितावच्छेदककसाध्यानुमितिसामान्यविरोधित्वेन गगनाभाववत्सर्वात्मकबाधेऽतिव्याप्तिवारणं विरोधवारकसाध्यसामानाधिकरण्यग्रहाविरोधित्वविशेषणेन दीधितिकृता दर्शितम् । तत्र साध्यसामानाधिकरण्यज्ञानस्य साध्यांशे निर्धर्मितावच्छेदककतयाऽप्रतिबध्यत्वमभिप्रेत्य तत्रातिव्याप्तिवारणाय स्वातन्त्र्येण साध्यानुमितिसामान्यविरोधित्वं विशेषणमुपात्तं, तत्र तादृशसाध्यसामानाधिकरण्यग्रहस्य प्रतिबध्यत्वपक्षेऽधिकरणत्वावच्छिन्नविशेषणतापन्नसाध्यसामानाधिकरण्यग्रहाविरोधित्वनिवेशेनैव तादृशतिव्याप्तिवारणसंभवात् किं गुरुतरोक्तविशेषणोपादानेन ॥

यत्तु साध्याधिकरणताघटितसाध्यसामानाधिकरण्यग्रहविरोधित्वनिवेशे गगनसाध्यकाधिकरणत्वहेतुकस्थलीये अधिकरणत्वावच्छेदेन गगनाभावघटितगगनाभाववदधिकरणात्मकव्यभिचारे तादृशसाध्यसामानाधिकरण्यग्रहविरोधिनि अव्याप्तिमिया

**विशेषणान्तरमुपात्तमिति समाधानं** **तत्तुच्छम्** । किंचिद्धर्मावच्छिन्नविशेषणतापन्न-साध्यघटितसाध्यसामानाधिकरण्यग्रहाविरोधित्वेनोक्तव्यभिचाराव्याप्तिविरोधाद्यतिव्याप्त्योरनवकाशात् ।

**वस्तुतस्त्व**धिकरणत्वावच्छेदेन गगनाभावघटितस्य शुद्धस्वरूपसंबन्धेन गगनाभाववदधिकरणात्मकविशिष्टान्तरेण व्यभिचारेण घटितत्वेनालक्ष्यत्वान्न तत्रैतल्लक्षणाद्यव्याप्तिः । नच प्रकृतलक्षणातिव्याप्तिः हेत्ववच्छेदेन साध्याभावज्ञानस्य हेतुमान् साध्यवानिति ज्ञाने इव हेतुः साध्यवदवृत्तिरिति ग्रहे विरोधितया हेतौ साध्यसामानाधिकरण्यग्रहाविरोधित्वमात्रनिवेशे तदनवकाशात् । एतेन तादृशव्यभिचारे उक्तरीत्या तादृशविशेषणाघटितस्य साध्यसामानाधिकरण्यग्रहाविरोधित्वस्य दुरुपपादतया तदलक्ष्यताया एव ज्यायस्त्वादिति चेन्न, तस्यापि लक्षणान्तरत्वात् ॥

**यद्यपी**त्यादिपाठः काचित्कः, तत्र प्रकृतसाध्यविधेयकानुमितिव्यापकतावच्छेदकं यद्रूपावच्छिन्नविषयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यत्वं तद्रूपान्यत्वमर्थः ॥ तेनोक्तस्थले बाधनिश्चयीयप्रतिबध्यताया उभयाभावादिकमादाय व्यापकत्वाभावेऽपि न क्षतिः । अवच्छिन्नत्वं स्वरूपसंबन्धविशेषः । **एतेन** साध्यविधेयकानुमितिवृत्तिभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वनिवेशे समानधर्मितावच्छेदककशब्दत्ववत्ताज्ञानविशिष्टासाधारण्यनिश्चयनिरूपितप्रतिबध्यतायास्समानधर्मितावच्छेदकनित्यत्वानुमित्यादिनिष्ठाया भिन्नभिन्नतया न कस्यामपि तस्यां तादृशानुमितित्वव्यापकतासंभवः । एवं प्रकृतसाध्यकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिरूपकतावच्छेदकतापर्याप्त्यनधिकरणत्वमविरोधित्वान्तार्थः । स चासमानधर्मिकसाध्यानुमितिमादाय व्यापकताभङ्गादसाधारण्यविषयताया अविशिष्टज्ञानसाधारणतया अप्रतिबन्धकज्ञानवृत्तित्वाच्च । अत एवाव्याप्त्याशङ्काया अनवकाश इत्यपास्तम् ॥

वस्तुतस्तु प्रकृतसाध्यकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयताशून्यत्वमात्रं अनुमितिसामान्याविरोधित्वं, तत्र च नानुपपत्तिलेशोपीत्येतत्पाठः, कुण्डलितः । अत्र प्राचीनमतं निराकृत्यानुमितिसामान्याविरोधित्वरूपविशेषणवैयर्थ्यं सूचयति—**इदं त्विति** ॥ सर्वान्तर्गतमिति घटितस्वरूपसंबन्धलाभाय (?)। स्वयं तद्विशेषणसार्थक्याय भूमिकामारचयति —**वस्तुस्त्वित्यादिना** ।



केवलान्वयित्वविशिष्टस्य साध्याभावस्य बाधप्रवेशव्युत्पादनाय तद्धर्मावच्छिन्ने साध्याभावप्रकारकत्वसहितस्य तद्धर्मव्यापकतावगाहित्वस्यातन्त्रतां प्रथमतो निराकरोति—**तद्धर्मितेति** । एतन्निराकरणं च तद्धर्मावच्छिन्ने केवलान्वयित्वविशिष्टसाध्याभावज्ञानमेव बाधमुद्रया विरोधि, तच्च न सर्वमाकाशाभाववदित्याकारकमित्याशङ्कावारणाय । **सामान्यघटितेति** । सामान्याभावबोधोऽपि सामान्यघटितविशेषवत्ताबुद्धिमित्यनेनैतन्नियमस्यैव प्रकाशनादिति भावः ।

नन्वेतावता सर्वमाकाशाभाववदित्यत्र किमायातमित्याशङ्कायां सर्वपदं न धर्मिविषयकत्वलाभार्थं किन्तु केवलान्वयित्वावगाहित्वस्य । एवं च तादृशशब्देनाकाशाभावो वृत्तिमदत्यताभावाप्रतियोगीत्येव बुद्धिरभिप्रेता घटपटादावाकाशवत्ताग्रहं प्रति घटत्वपटत्वादिव्यापकत्वविशिष्टाकाशाभाववत्ताग्रहो यथायथं प्रतिबन्धकः । उक्तबुद्धिस्तु सामान्याभावविषयवत्तया सर्वस्मिन्नेव तस्मिन्निति तद्विषयेऽतिव्याप्तिरित्याह—**सर्वमिति** । **बाध इति** ॥ पक्षसाध्यवैशिष्ट्यावगाहिग्रहविरोधित्वादिति शेषः । वृत्तिमदत्यन्ताभावाप्रतियोगित्वविशिष्टवह्न्यभावादिग्रहस्य ह्रदो वह्निमानिति ग्रहविरोधित्वेऽपि न तद्विषये बाधोऽप्रसिद्धत्वात् तद्व्यावृत्तये एवकारः । स बाध एवेति तु वस्तुगतिः दीधितिस्थसत्प्रतिपक्षरूपव्यावर्त्यन्तु प्राचीनमताभिप्रायेणेति बोध्यम् । तत्र पूरितविशेषणसार्थक्यमाह—**अनुमितीति** ।

ननु वह्निमद्ध्रदकालीनवह्निमान् जलवद्ध्रदात् जलवद्ध्रदकालीनह्रदत्वाद्वेत्यादौ वह्निव्यापकीभूताभावप्रतियोगिजलेऽसाधारण्यानात्मके ह्रदत्वावच्छिन्नविशेषणतापन्नहेतुमत्ताज्ञानसहिततादृशजलनिश्चयसामान्यस्य वह्निघटितप्रकृतसाध्यविधेयकस्वसमानकालीनहेतुमत्ताज्ञानधर्मितावच्छेदककानुमितिसामान्यविरोधित्वादतिव्याप्तिः । न च सधर्मितावच्छेदकहेतुमत्ताज्ञानकालीनयादृशविशिष्टविषयकनिश्चय एव साध्यसामानाधिकरण्यग्रहाविरोधित्वं निवेश्यम् । तथाच हेतुमत्ताज्ञानसहिततादृशजलज्ञानस्य साध्यसामानाधिकरण्यग्रहप्रतिबन्धकत्वेन नातिव्याप्तिरिति वाच्यं, तथा सति तत्रत्यवह्निव्यापकीभूताभावप्रतियोगिह्रदत्वरूपासाधारण्येऽव्याप्त्यापत्तेः हेतुमत्ताज्ञानसहिततादृशह्रदत्वज्ञानस्यापि साध्यसामानाधिकरण्यग्रहविरोधित्वात् । एवं वह्निमज्जलवत्कालीनवह्निसाध्यकजलहेतुकस्थलीयवह्निव्यापकीभूताभावप्रतियोगिजलात्मकासाधारण्येऽव्याप्तिः तद्धर्मावच्छिन्नधर्मिकतद्वत्ताबुद्धिं प्रति तद्धर्मे तदभावीयान्वयव्याप्तिबुद्धेरिव तदभावीयव्यति-

रेकव्याप्तिबुद्धेरपि विरोधितया जलावच्छिन्नविशेषणतापन्नवह्निघटितसाध्यसामानाधिकरण्यग्रहविरोधित्वादिति चेन्न ।

साध्यसामानाधिकरण्यग्रहविरोधीत्यस्य स्वसमानकालीनहेतुमत्ताज्ञानधर्मितावच्छेदककानुमितित्वव्यापकप्रतिबध्यत्वान्वितसाध्यसामानाधिकरण्यग्रहत्वन्यूनवृत्तित्वार्थकत्वात् वह्निव्यापकीभूताभावप्रतियोगिजलादौ नातिव्याप्तिः । जलवद्ध्रदवान् घट इति ज्ञानसहितवह्निव्यापकीभूताभावप्रतियोगिजलनिश्चयस्य ह्रदत्वावच्छिन्ने वह्न्यवगाहिताघटितधर्मावच्छिन्नप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपकत्वेऽपि तादृशप्रतिबध्यताया वह्निमद्ध्रदकालीनवह्निसमानाधिकरणो जलवद्ध्रद इति स्वसामानाधिकरण्यग्रहत्वान्यूनवृत्तित्वात् । एवं तत्रैव जलवद्ध्रदवद्भूतलमिति ज्ञानसहितवह्निव्यापकीभूताभावप्रतियोगी जलवद्ध्रद इति निश्चयसामान्यस्य भूतलत्वावच्छिन्नधर्मिके वह्न्यवगाहिताघटितधर्मावच्छिन्नायाः सामानाधिकरण्यग्रहत्वन्यूनवृत्तिप्रतिबध्यताया निरूपकत्वात् , वह्निव्यापकीभूताभावप्रतियोगिजलवद्ध्रदात्मकासाधारण्ये नाव्याप्तिः । न च जलवद्ध्रदवान् ह्रद इति ज्ञानसहितवह्निव्यापकीभूताभावप्रतियोगिजलवद्ध्रदरूपासाधारण्यनिश्चयस्य तादृशनिश्चयसामान्यान्तर्गतस्य स्वसमानकालीनहेतुमत्ताज्ञानधर्मितावच्छेदकीभूतह्रदत्वावच्छिन्ने तादृशवह्न्यनुमितित्वव्यापकह्रदत्वावच्छिन्ने वह्न्यवगाहिताघटितधर्मावच्छिन्नप्रतिबध्यताया एव निरूपकत्वेनातादृशप्रतिबध्यतायाश्च वह्निमद्ध्रकालीनवह्निसमानाधिकरणो जलवद्ध्रद इति निश्चयात्मकसाध्यसामानाधिकरण्यग्रहत्वान्यूनवृत्तित्वात्तादृशजलवद्ध्रदरूपासाधारण्येऽव्याप्तितादवस्थ्यमिति वाच्यं, साध्यतावच्छेदकावच्छिन्नघटकतानवच्छेदकत्वेन सधर्मितावच्छेदकहेतुमत्ताज्ञानकालीनेत्यत्र धर्मितावच्छेदकस्य विवक्षितत्वात् ॥

एवं द्वितीयवह्निव्यापकीभूताभावप्रतियोगिह्रदत्वात्मकासाधारण्यस्यापि संग्रहः । तन्निश्चयस्य सामानाधिकरण्यग्रहत्वन्यूनवृत्तिप्रतिबध्यताकत्वात् । एवं च वह्निव्यापकीभूताभावप्रतियोगिजलकालीनवह्निसाध्यकजलहेतुकस्थले वह्निव्यापकीभूतभावप्रतियोगिजलस्याप्यसाधारण्यतोपपत्तिः साध्यव्यापकीभूतभावाप्रतियोगित्वस्य हेतुतावच्छेदकतास्थले तु यत्र तादृशहेतुमत्ताज्ञानस्य लौकिकत्वसंभवस्तत्रैव तत्रत्यासाधारण्यसङ्ग्रहः अन्यत्रागत्याऽसिद्धित्वमेव ।

**एतेन** किंचिद्धर्मावच्छिन्ने हेतुमत्तावगाहित्वं यादृशविषयकनिश्चये निवेश्य सधर्मितावच्छेदककहेतुमत्ताज्ञानकालीनत्वं निश्चयविशेषणं गौरवग्रस्तमिति **परास्तम्** ।



हेतुमत्ताग्रहविरोधिदर्शितासाधारण्यसंग्रहार्थत्वात् । एवंच साध्याप्रसिद्धिसाधनाप्रसिद्धिविरोधातिव्याप्तिवारणार्थं साध्यसामानाधिकरण्यग्रहाविरोधित्वदलनिवेशपरग्रन्थस्यापि यत्र साधनाप्रसिद्धेः लौकिकत्वसंभवः तत्रैवातिव्याप्तिपरत्वं बोध्यम् ।

एवमनुमितिसामान्याविरोधित्वमपि विशेष्यदलप्रविष्टप्रकृतानुमितित्वव्यापकप्रतिबध्यत्वान्वितप्रकृतसाध्यानुमितित्वन्यूनवृत्तित्वार्थकम् । अतो वह्निमज्जलवत्कालीनवह्न्यादिसाध्यकजलहेतुकस्थलीयवह्निव्यापकीभूताभावप्रतियोगिजलात्मकासाधारण्ये नाव्याप्तिः । हेतुमत्ताज्ञानसहिततादृशजलज्ञाननिष्ठज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतायाःप्रकृतसाध्यानुमितित्वन्यूनवृत्तित्वात्तामादायैव लक्षणसमन्वयादिति ।

**यत्तु** साध्यसाधनसामानाधिकरण्यग्रहाविरोधित्वदलस्य साध्यसाधनसामानाधिकरण्यग्रहत्वव्यापकप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकत्वं यद्रूपावच्छिन्नविषयित्वान्वितमर्थः विशेष्यदलप्रतिबन्धकतायां ज्ञानवैशिष्ट्यवच्छिन्नत्वासाधारण्यविषयकत्वानवच्छिन्नत्वोभयाभावः प्रवेशनीयः । एवंच वह्निमद्ध्रदकालीनवह्निसाध्यकत्ववद्ध्रदहेतुकस्थले वह्निव्यापकीभूताभावप्रतियोगिजले नातिव्याप्तिः । हेतुमत्ताज्ञानविशिष्टतादृशजलज्ञाननिष्ठप्रतिबन्धकतायां तादृशोभयाभावसत्वात् वह्निमद्ध्रदकालीनवह्निसाध्यकह्रदत्ववद्ध्रदकालीनह्रदहेतुकस्थले वह्निव्यापकीभूताभावप्रतियोगिह्रदत्वे नाव्याप्तिः । हेतुमत्ताज्ञानविशिष्टतादृशहेतुज्ञानीयप्रतिबन्धकतायामसाधारण्यविषयकत्वानवच्छिन्नत्वविरहादेवोक्तोभयाभावसत्वात् तद्विषयतायां साध्यसामानाधिकरण्यग्रहत्वव्यापकप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वेऽपि ज्ञानवैशिष्ट्यानवच्छिन्नतादृशप्रतिबन्धकतानवच्छेदकत्वादिति ।

**तन्न मनोरमम्** । वह्निमज्जलवत्कालीनवह्निसाध्यकजलहेतुकस्थले वह्निव्यापकीभूताभावप्रतियोगिजलविषयतायां धर्मितावच्छेदकनिष्ठग्राह्याभावान्वयव्याप्तिज्ञानत्वेनेव तन्निरूपितव्यतिरेकव्याप्तिज्ञानत्वेनोक्तप्रायायां साध्यसामानाधिकरण्यग्रहनिरूपितज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकत्वात् । नच तस्य साध्याप्रसिद्ध्यन्तर्भावेण क्षतिविरह इति वाच्यं ; तुल्ययुक्त्या काञ्चनमयवह्निसाध्यकधूमहेतुकस्थलेपि काञ्चनमयत्वव्यापकीभूताभावप्रतियोगिधूमस्यापि साध्याप्रसिद्धित्वापातात् । नचेष्टापत्तिः सामान्यलक्षणानाक्रान्तत्वात् । एवं वह्निमद्ध्रदकालीनवह्निसाध्यकजलवद्ध्रदकालीनजलवद्-

द्रव्यादेः स्वरूपसंबन्धेन हेतुतास्थले वह्निव्यापकीभूताभावप्रतियोगिजलत्वावच्छिन्नासाधारण्यात्मकतादृशद्रव्यत्वावच्छिन्नोभयविषयकतया वह्निव्यापकीभूताभावप्रतियोगिजलात्मकं तादृशद्रव्यमिति ज्ञाननिष्ठप्रतिबन्धकतायामवच्छिन्नत्वेन तत्तोभयाभावसत्वेन वह्निव्यापकीभूताभावप्रतियोगिजलेऽतिव्याप्तेर्वज्रलेपत्वात् ।

**केचित्त्वनु**मितिसामान्याविरोधित्वमित्यत्र विरोधित्वमसाधारण्यविषयकत्वानवच्छिन्नमुपादेयं, तेन वह्निमद्ध्रदादिकालीनवह्निसाध्यकजलवद्ध्रदादिहेतुके तादृशजलस्यासाधारण्यानात्मकतया प्रतिबन्धकतायास्तद्विषयकत्वानवच्छिन्नतया नातिव्याप्तिः । यत्तु प्रकृतानुमितित्वव्यापकप्रतिबन्धकतायां प्रकृतसाध्यज्ञानत्वन्यूनवृत्तितानिवेशान्न दोष इति । तन्न । एवं सति तत्स्थलीयाधारण्येऽव्याप्तेरित्याहुः । तन्न, उक्तरीत्योपपत्तेर्विशेषणपूरणानौचित्यात् । **केचित्तु** विशिष्टसाध्यघटकधर्मितावच्छेदकतानिरूपितविशेष्यत्वानवच्छिन्नत्वं प्रतिबध्यताविशेषणम् । उक्तस्थले च वह्न्यभावव्याप्यं बलं जलवान् ह्रद इति ज्ञानीयप्रतिबध्यताया विशिष्टसाध्यघटकह्रदत्वनिष्ठधर्मितावच्छेदकतानिरूपितविशेष्यत्वावच्छिन्नत्वात्तादृशज्ञानव्यावृत्तिः । नचैवं तत्रैव वह्न्यभावव्याप्यजलवद्ध्रदकालीनह्रदत्वरूपासाधारण्येऽव्याप्तिः । तादृशासाधारण्यज्ञानीयतथाविधप्रतिबध्यतायाः ह्रदत्वधर्मिताच्छेदकहेतुमत्तानिश्चयसमानधर्मितावच्छेदककानुमितित्वाव्यापकत्वादिति वाच्यं, उक्तदोषवारणायानुमितौ धर्मितावच्छेदकतासंबन्धेन हेतुमत्तानिश्चयव्यापकताया उक्तत्वात् तत्र संसर्गीभूतधर्मितावच्छेदकतायां विशिष्टसाध्यघटकधर्मव्यावृत्तत्वस्य निवेश्यत्वात् ।

एतेनोक्तस्थलेऽतिव्याप्तिवारणाय सधर्मितावच्छेदककेत्यत्र प्रतिबन्धकतायां ज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयत्वानवच्छिन्नत्वोभयाभावनिवेशे उक्तस्थलेवह्न्यभाववद्ध्रदादिविषयताया हेतुमत्तानिश्चयसमानधर्मितावच्छेदककानुमितित्वव्यापकप्रतिबध्यतानिरूपिततादृशोभयाभाववत्प्रतिबन्धकतानतिरिक्तवृत्तित्वात्तादृशबाधेऽतिव्याप्तिरिति परास्तम् ।

---

# SUFI POET JAYASI

*By*

**Dr. S. SHANKAR RAJU NAIDU,** M. A., Ph. D.,
*Head of the Department of Hindi,*
*University of Madras,*
**MADRAS.**

# சூபி கவி ஜாயஸி


டாக்டர் சு. சங்கரராசு நாயுடு, எம்.ஏ., பி-எச்.டி.,
இந்தித் துறைத் தலைவர்,
சென்னைப் பல்கலைக்கழகம்.


——(o)——

கவிச்சக்கரவர்த்தி கம்பர் தந்தருளிய கம்பராமாயணத்தின் யாப்பு முறை தண்டமிழ்க் கவிஞர் திருத்தக்கத்தேவர் தந்தருளிய சீவகசிந்தாமணியைத் தழுவியது என்பதனைத் தமிழ் அறிஞர் அனைவரும் நன்கறிவர். அதுபோலவே பக்தகவி துளசிதாசர் பாடியுள்ள பெருங்காப்பியமாகிய இராம சரித மானஸத்தின் யாப்பு முறை அவருக்கு முன்னோடியாக இருந்த அவதி மொழிக் கவிஞராகிய சூபி கவி ஜாயஸியின் ‘பத்மாவத்’தைத் தழுவியதாகும். சீவகசிந்தாமணியில் எவ்வாறு சமண சமயக் கொள்கைகள் கையாளப்பட்டு, அம்மதம் தமிழர்களுக்கும் சம்மதமாக வேண்டுமென்ற ஆர்வத்துடன் தமிழ் மொழியில் ஆக்கப்பட்டுள்ளதோ அதேபோல சூபி மதத்தை வட இந்தியாவில் இந்திமொழி பேசுவோரும் சம்மதிக்க வேண்டும் என்ற ஒரே ஆர்வத்துடன் மாக்கவி மலிக்முகம்மத் ஜாயஸி இந்துக்களுடைய கதையையே எடுத்து இவர்களுடைய மொழியாகிய இந்தியின் கிளைமொழி அவதியில் இந்தியின் ஒரு சிறந்த யாப்புமுறையாகிய ‘தோகா சௌபாயி’யில் இயற்றி இருக்கின்றார். இக்காப்பியம் இந்தியில் மேம்பாடுடைய கவிஞராகிய துளஸிதாசருக்கே ஒரு வழிகாட்டியாக அமைந்து இருந்தது.[1] இவ்வாறு இந்தி இலக்கியத்தில் சூபி கவி ஜாயஸிக்கு ஒரு தனி இடம் உண்டு.

இந்தி இலக்கியத்தில் இறைவழிபாடு சிறப்பாக நான்கு முறைகளில் இயக்கப்பட்டிருக்கிறது நிர்குணனாகிய இறைவனை அறிவினாலும் அன்பினாலும் வழிபடுதலாகிய இரு முறைகள்; சகுணனாகிய இறைவனைப் பேரவதாரங்களாகிய இராமனையும் கிருஷ்ணனையும் அடிப்படையாகக் கொண்ட

1. “The Avadhi of Jayasi was later on crystallised in the *Manas* of Tulsidas; even the same metre was used in the Ramcharitmanas.”—P. 47. ‘A History of Hindi Literature’ by K. B. Jindal.

இருமுறைகள். இந்நான்கில் முதற்கூறப்பட்ட முறையாகிய ‘நிர்குண’ இறைவனை, அன்பையே கடைப்பிடித்து முத்தி வழி பெறுகின்ற வழிப்பாட்டினை சூபீ கவி ஜாயஸி மேற்கொண்டுள்ளார். இம்முறையைத் தழுவிய காப்பியங்களில் குதுபனுடைய ‘மிருகாவதி’, மஞ்சனுடைய ‘மதுமாலதி’, உஸ்மானுடைய ‘சித்திராவலி’, நூர்முகம்மதுடைய ‘இந்திராவதி’ ‘அனுராக பான்ஸுரி’ முதலிய நூல்களையெல்லாம்விட ஜாயஸியின் ‘பத்மாவத்’ என்பதே சாலச்சிறந்ததாகும். சூபிமதத்தின்படி இவ்வுலகின்கண் அல்லது அவ்வுலகின்கண் காட்டப்படும் தூய காதல்களில் அடிப்படையான வேற்றுமை கிடையாது. உண்மையான அன்பில் ஊறின உலகவாழ்க்கை இறைவழிபாட்டிற்கும் இன்றியமையாதது. இதுவே பின்பு சரீயத், தரீகத், ஹகீகத், மார்பத் என்ற நான்கு படிகளில் செலச் செய்து வாழ்க்கையின் பயனை இகத்திலும் பரத்திலும் பெறச் செய்கிறது. இத்தத்துவத்தையே கடைப்பிடித்துத் தன் காப்பியங்களை வரைந்த கவி ஜாயஸியைப் பற்றி ஆராய்ச்சி அறிஞர் ராமச்சந்திர சுக்ல இவ்வாறு கூறுகின்றார் :—

“कबीर ने भिन्न प्रतीत होती हुई परोक्ष सत्ता की एकता का आभास दिया था । प्रत्यक्ष जीवन की एकता का दृश्य सामने रखने की आवश्यकता बनी थी । यह जायसी द्वारा पूरी हुई ।”[1]

அதாவது, வேறாகத் தோன்றும் பரத்துவத்தின் ஒற்றுமையை மட்டுமே கபீர் வெளிப்படச் செய்தார். உலக வாழ்க்கையின் ஒற்றுமையை எடுத்துரைக்க வேண்டியிருந்தது. இது ஜாயஸியால் முடிவுற்றது.

ஆகவே மக்களுடைய மனப் பாங்கிற்கு இசைந்து, உள்ளத்தின் உணர்ச்சி வெள்ளத்தை இறைவனடியில் ஈடுபடுத்த இந்துக்களையும் சேர்ப்பதற்கேற்ற ஒரு பெருமுயற்சி என ஜாயஸியின் ‘பத்மாவத்’ என்ற பெருங் காப்பியத்தைச் சொல்லலாம்.

---

1. ‘हिन्दी साहित्य का इतिहास’ - ( आठवाँ संस्करण, सं० २००९ वि० ) रामचन्द्र शुक्ल—पृ० १०१.



ஜாயஸிக்கு எவ்வாறு தன்மதத்தில் பற்று இருந்ததோ அவ்வாறே தனது பாரசீக இலக்கிய முறையிலும் தன் அரசனிடமும் ஓயாப் பற்று இருந்தது. ‘பத்மாவத்’ இந்தியின் ஒரு பேச்சு வழக்காகிய அவதியில் இயற்றப்பட்ட போதிலும் அதனைப் படலங்களாகப் பிரிக்காமல் பாரஸீக ‘மஸ்னவி’க்களின் முறையிலேயே எழுதி இருக்கிறார். தன் முன்னோர்களையும் சிறப்பாகத் தன் அரசனையும், தொடக்கத்திலேயே போற்றி இருக்கிறார். தாய் தந்தையரால் கொடுக்கப்பட்ட தன் பரு உடலில் ஒரு குறைவிருப்பினும், அதாவது இரு கண்களில் ஒரு கண் பயனற்றிருந்தும், அதனையும் ஒரு நிறைவாகக் கருதி, ‘எல்லோரையும் நான் ஒரே கண் கொண்டு பார்க்கிறேன்’ என்று மாக்கவிஞனுக்கேற்ற முறையில் பறைசாற்றுகிறார். மற்றொரு முறை இவரைப் பார்த்து ஒரு அரசன் நகைத்த போது, ‘சிரிப்பது என்னைப் பார்த்தா என்னைச் செய்த குயவனைப்பார்த்தா’[1] என்று கேட்டாராம். அவ்வரசன் வெட்கப்பட்டுத் தலைகுனிந்து மாக்கவிஞனிடம் மன்னிப்புக் கேட்டுக்கொண்டான்.

மக்களுடைய உள்ளத்தைத் தொடவேண்டுமென்றால், அம்மக்கள் தம் உணர்ச்சிகளை எம்மொழியில் வெளியிடுகின்றனரோ அம்மொழியிலேயேயன்றிப் பிறமொழியில் அது ஒருபொழுதும் கைகூடாது என்பதனை நன்கு அறிந்த கவி ஜாயஸி தனது தத்துவங்களை பரப்ப, மக்கள் பேசிவரும் மொழியாகிய அவதியிலேயே பா இசைத்து அவர்களுக்குத் தந்திருக்கிறார். இதிலிருந்தே கவி ஜாயஸியின் உள்ளத்தின் ஆழத்தை நன்கறியலாம்.

ஜாயஸ் என்ற ஊரில் சென்று வாழ்ந்தமையால் இவருக்கு ஜாயஸி என்ற பெயர் நிலவியது. இஸ்லாமியக் கல்விகளைக் கசடறக் கற்று, இவர் ஓரளவு இந்திய மொழிகளையும் தத்துவ புராணங்களையும் கேள்வியால் உணர்ந்தவர். இவரால் இயற்றப்பட்ட நூல்கள் பத்மாவத், அக்ராவட், ஆகிரீகலாம் என்ற மூன்றாகும். இவற்றுள் ‘பத்மாவத்’ தான் மிகச் சிறந்தது. அக்ராவட் ஒருமெய் விளக்கியல் நூல்; ஆகிரீகலாமில் கடையூழி பற்றிய கருத்துக்கள் சிறப்பாகத் தீட்டப்பட்டிருக்

---

1. “मोहिं कहँ हँससि कि कोहरहि”।

கின்றன. சுமார் கி. பி. 1520-ல் இயற்றப்பட்ட பத்மாவத்தின் கதைச் சுருக்கம் வருமாறு :—

சிங்களத் தீவின் அரசர் கந்தருவ சேனனின் கன்னிப் பெண் பத்மினி பேரழகு பொருந்தியவள். அது மட்டுமன்றி நீரில் அவள் பார்க்கின்ற இடமெல்லாம் தாமரை பூத்தலும் உடல் பட்ட இடமெல்லாம் தண்ணீர் தூய்மை அடைதலும், புன்சிரிப்பின் ஒளிபட்ட இடமெல்லாம் வெண் அன்னங்கள் பிறத்தலும் வெண் பற்களின் ஒளிபட்ட இடமெல்லாம் வெண் முத்துக்களும் ரத்தினங்களும் தோன்றுவனவாக இருந்தது கவிஞர் இதனை இவ்வாறு புனைந்து வரைகிறார் :—

“ नयन जो देखा कमल भा, निरमल नीर सरीर ।
हँसत जो देखा हंस भा, दसन जोत नग हीर ॥ ”

இவளுக்குத் தக்கதொரு மணவாளன் கிடைக்காததைப் பற்றி ‘ஹீராமன்’ என்ற இவளுடைய தங்க நிறமுள்ள, கல்வியிற் சிறந்த கிளி இவளிடம் உரையாடியது. இதனைக் கேட்ட தந்தை தீராத சினங்கொண்டார். ஹீராமன் அச்சமுற்று ஒருநாள் அரண்மனையை விட்டு வெளியேறிவிட்டது. காட்டில் அது ஒரு வேடன் கையில் அகப்பட்டது. வேடன் அதனை ஒரு சித்தூர் நகரப் பண்டிதனிடம் விற்றுவிட்டான். அப் பண்டிதன் அந்த அறிவுள்ள கிளியை அரசர் ரத்தினசேன ரிடமிருந்து நூறாயிரம் பொற்காசுகள் பெற்று அவருக்குக் கொடுத்துவிட்டான். நாளுக்குநாள் அரசருக்கு அதனிடம் விருப்பம் பெருகிக்கொண்டே சென்றது. ஒரு நாள் அரசர் வேட்டைக்குச் சென்றிருந்த பொழுது அரசி நாகமதி அந்தக் கிளியிடம், “என்னைப்போல் பேரழகி இப்புவியில்உண்டோ”[1] என்று வினவினாள். கிளி சற்று சிரித்தது. பின்பு தனது அரசிளங்குமரி பத்மினியின் பேரழகைப்பற்றி எடுத்துரைத்து, “இரவு போல் நீ என்றால் பகல் போல் அவள்”[2] என்று

---

1. “ मेरे रूप कोइ जग माहाँ ? ”
× × × ×
“ है कोई एहि जगतमहँ, मोरे रूप समान ? ”

2. “ का पूछहु सिंघल कै नारी ।
दिनहिं न पूजै निसि अँधियारी ॥ ”



சொல்லி முடித்தது. தாங்க முடியாத் துயரங்கொண்டு நாகமதி
அதனை உடனே கொன்றுவிடுமாறு தன் சேடியிடம் கட்டளை
யிட்டாள். அரசரின் விருப்பம் தெரிந்த அந்த சேடி கிளியைக்
கொல்லாமல் அதனைத் தன் இல்லத்தில் ஒளித்துவைத்துக்
கொண்டாள். அரசர் திரும்பியதும் கிளியைக் காணாமல் மிக
வருந்தி சீற்றமுற்றார் கடைசியாகக் கிளி கொண்டுவரப்பட்டது.
கிளியிடமிருந்து நடந்த கதையை முற்றிலும் கேட்டு, அரசர்
பத்மினியிடம் தீராக் காதல் கொண்டு மதிமயங்கி கீழே விழுந்
தார். மயக்கம் தெளிந்த பிறகு அவர் துறவிக் கோலம் பூண்டு
தன் காதல் தெய்வத்தைத் தேடப் புறப்பட்டார். அறிவிற்
சிறந்த அக்கிளி வழிகாட்டியாக முன் செல்ல, இவருக்குப் பின்
பதினாயிரம் இளைஞர்களும் துறவிகளாகிச் சென்றார்கள்.
எத்தனையோ இன்னல்களுக்கு ஆளாகிக் கால் நடையாலும்,
உயர்ந்த அலைகள் வீசும் கடல்களைக் கப்பல்களாலும் கடந்து
கடைசியாக ஒருவாறு சிங்களம் சேர்ந்தார்கள். அங்கு ஒரு
சிவன் கோவிலில் அரசர் ரத்தினசேன் பத்மினியின் நினை
வாகவே மெய்மறந்து அமர்ந்திருந்தார். இவர் ஊழ்வினைப்
பயன் சற்றுக் குன்றி இருந்ததால் அதே நேரத்தில் பத்மினி
அங்கு வந்து சென்றும் இவருக்கு மயக்கத்தினால் அவளை
நன்கு காண முடியவில்லை. பத்மினியும் தன் இல்லம் திரும்பி
விட்டாள். பின்பு அவளுடைய கருத்தினை அறிந்து, சிவபெரு
மானுடைய அருள் பெற்று அன்றிரவு எல்லோருமாக அரண்
மனையில் ஏறத்தொடங்கினார்கள். அரண்மனையைப் பற்றிக்
கவிஞர் சொல்லுகின்றார் :

“ गढ़ तस बाँक जैसि तोरि काया ।
पुरुष देखु ओही कै छाया ॥

नौ पौरी तेहि गढ़ मँझियारा ।
औ तहँ फिरहि पाँच कोतवारा ॥

दसवँ दुवार गुपुत एक ताका ।
अगम चढ़ाव, बात सुठि बाँका ॥ ”

அதாவது, அக்கோட்டை மானிட உடலைப்போன்று அழகும், கிட்டுதற்கு அருமைப்பாடும் ஒருங்கே பொருந்தியதாக இருந் தது. இறைவனின் நிழலை இதின் கண் காணலாம். இதில்

ஒன்பது வாயில்கள் இருந்தன. ஐந்து காவலாளர்கள் இவைகளைச் சுற்றி பாதுகாத்து வந்தனர். இவைகளுக்கு மேல் ஒரு நுட்பமான பத்தாவது வழி இருந்தது. இதைக் கடந்து மேற்செல்வது மிகவும் அரிது. இதுதான் பத்மினியின் இருப்பிடம்.

ரத்தினசேன் முதலியவர்கள் அரண்மனையில் ஏறத் தொடங்கியது தெரிந்ததும், கந்தர்வசேன் தன் படைவீரர்களை இவர்கள் மேல் ஏவி விட்டான். ஆனால் ரத்தினசேனுடைய உதவிக்கு சிவபெருமானே ஹனுமான்[1] முதலியவர்களோடு வந்துவிட்டார். இதனைக் கண்ட கந்தருவசேன் தன் வழிபடு கடவுளாகிய பரமசிவனின் காலில் விழுந்து மன்னிப்புக்கேட்டு, அவருடைய கட்டளைப்படி பத்மினியை ரத்தினசேனுக்கு திருமணம் செய்து வைத்தார்.

இங்கு இவ்வாறு ரத்தினசேன் இன்புற்றிருக்க, சித்தூரில் அரசி நாகமதியின் நிலை, கணவனின் நெடுநாள் பிரிவினால், கவலைக்கு இடமாகியது. தீப்பற்றி எரிவது போலிருந்தது அவள் உடல் நிலை. மக்களிடம் பேசிப் பயனில்லை என்று முடிவுகட்டி, அவள் வண்டு, காகம் முதலியவைகளிடம் இவ்வாறு மன்றாடிக் கேட்டுக் கொண்டாள் :

"पिउ सौं कहेउ सँदेसड़ा, हे भौंरा, हे काग ।
सो धनि बिरहै जरि मुई, तेहि क धुआँ हम लाग ॥"

அதாவது, ஏ வண்டே, காகமே, என் விண்ணப்பத்தைக் கணவனிடம் சென்று சற்றுக் கூறுங்கள். அந்த மங்கை பிரிவாற்றாமையினால் எரிந்து இறந்துவிட்டாள். அதனுடைய புகை எங்கள்மேல் பட்டதினால் நாங்கள் கரு நிறம் கொண்டோம் என்று சொல்லுங்கள்.

சில நாட்கள் சென்றபின் நாகமதியின் நிலை இன்னும் மோசமாயிற்று. ஜாயஸி சொல்லுகிறார் :—

1. "पारबती सुनि पायन्ह परी ।
'चलि, महेस, देखैं एहि घरी' ॥"

मेस माँट माँटिनि कर कीन्हा ।
औ हनुवंत बीर सँग लीन्हा ॥"



"जेहि पंखी के निअर होइ, कहै बिरह कै बात ।
सोई पंखी जाय जरि तरिवर होइ निपात ॥"

அதாவது, எந்தப் பறவையின் பக்கத்தில் சென்று அவள் தன் பிரிவுத் துயரத்தை வெளியிட்டாளோ, அந்தப் பறவை உடன்மாண்டெரிந்தது. மரங்களும் இலையிலவாயின.

இவ்வாறு துன்பக் கடலில் ஆழ்ந்திருந்த நாகமதியின் நிலைமையை, வேட்டைக்குச் சென்றிருந்த ரத்தினசேன் ஒரு பறவையின் வாயிலாக அறியநேர்ந்தது; உடனே அவருக்கு வீடு திரும்ப வேண்டும் என்ற அவா பிறந்தது. இதனைக் கந்தருவசேன் அறிந்ததும் ரத்தினசேனரைத் தன் மகளோடு அளவுக் கடங்காத உயர் பொருள் வகைகளும் பரிசாக வழங்கி வழியனுப்பி வைத்தார். சித்தூர் வந்த எல்லோரும் இன்புற்று வாழ்ந்தார்கள்.

ஆனால் இவ்வாழ்வு நீண்டநாள் நிலைக்கவில்லை. இராகவ சேதன் என்ற ஒரு பண்டிதனின் சூழ்ச்சியினால் இரத்தின சேனருக்கும் தில்லீ சுல்தானாகிய அலாவுத்தீனுக்கும் பெரியதோர் பகை ஏற்பட்டது. பத்மினியின் அழகே இதற்கு அடிப்படையாக நிலவியது. அலாவுத்தீனுக்கு தக்கதொரு பாடம் கற்பிக்க கோரா-பாதல் என்ற வீரர்கள் தம்மொடு எழுநூறு பல்லக்கில் பொருநர்கள் வர, தில்லிக்குச் சென்று தம் அரசர் ரத்தின சேனரை சூட்சியால் மீட்டுச் சித்தூர் வந்து சேர்ந்தார்கள். இதற்குள் கும்பல்நேர் நாட்டு மன்னன் தேவபால் ரத்தினசேனர் இல்லாத சமயத்தில் பத்மினிக்குக் காதல் செய்திகளை அனுப்பி இருந்தான். இதை அறிந்ததும் ரத்தின சேன் அவன் மேல் படை எடுத்தார். போர் மூண்டது. இருவரும் மாண்டனர். இரத்தினசேனரோடு பத்மினியும் நாகமதியும் மகிழ்ச்சியுடன் உடன்கட்டையேறினார்கள். மீண்டு சென்ற சித்தூர் அரசர்மேல் அலாவுத்தீனும் உடன் படை எடுத்தான். ஆனால் சித்தூரில் அலாவுத்தீனுக்குக் கிடைத்தது அவர்கள் சாம்பலேயன்றி வேறொன்றுமில்லை.[1]

1. "वै सहगमन भईं जब जाई ।
बादसाह गढ़ छेंका आई ॥
× × × ×
छार उठाइ लीन्ह एक मूठी ।
दीन्ह उड़ाइ पिरथिमी झूठी ॥"

கதை இவ்வாறிருக்க இதனின் கருத்து மற்றொன்றாகும். இதில் சூபி தத்துவம் நிறைந்திருக்கிறது. இதன் உட்பொருளை சூபி கவி ஜாயஸி இவ்வாறு கூறுகின்றார் —

"तन चितउर मन राजा कीन्हा ।
हिय सिंहल बुधि पदमिनि चीन्हा ॥
गुरु सूआ जेइ पंथ देखावा ।
बिन गुरु जगत को निरगुन पावा ॥
नागमती यह दुनिया धंधा ।
बाँचा सोइ न, एहि चित बंधा ॥
राघव दूत सोई सैतानू ।
माया अलाउदीं सुलतानू ॥"

அதாவது, மானிட உடலைச் சித்தூராகவும் மனத்தை அரசனாகவும் கொள்ளல் வேண்டும். அதுபோலவே இதயத்தைச் சிங்களமாகவும் அறிவைப் பத்மினியாகவும் கருதல் வேண்டும். வழிகாட்டியாகிய கிளியை ஆசிரியராகவும், நாகமதியை இகமாகவும், ராகவசேதனை சைதானாகவும், அலாவுத்தீனை மாயையாகவும் கொள்ளல் வேண்டும். முன்பு சொல்லப்பட்ட பத்மினியின் அரண்மனை மானிட உடலையே குறிக்கும். அறிவுள்ள ஐந்து காவலாளர்களைக் காம, குரோத, மத, லோப மோகமென்பார்கள்.

'பத்மாவத்' ஒட்டணி (அதாவது பிறிது மொழிதலு)க்கு ஒரு சிறந்த எடுத்துக் காட்டாகும். உண்மையில் இங்குப் பத்மினியை இறைவனாகவும், ரத்தினசேனரை ஜீவனாகவும் வைத்துப் புனைந்து கூறப்பட்டிருக்கிறது. ஆங்கிலத்தில் இதைப் போன்ற ஒரு நூல் ஜான் பன்யன் என்பவருடைய 'பில்கிரிம்ஸ் புராக்ரெஸ்' ஆகும்.[1] காப்பியத்தில் மற்றொரு சிறப்பு

1. "पिलग्रिम्स प्रोग्रेस (Pilgrim's Progress) में जैसी साधक के मार्ग की कठिनाइयाँ दिखलाई गई हैं वैसी पद्मावत में भी दिखाई गई हैं। भेद इतना ही है कि पिलग्रिम्स प्रोग्रेस अन्योक्ति (Allegory) है, पद्मावत में ऐतिहासिक कथानक के साथ साथ मौका आने पर अन्योक्तियों द्वारा रहस्यवाद के सिद्धान्तों का प्रतिपादन किया गया है।"—डा॰ गुलाबराय तथा श्री रामचन्द्र, 'पद्मावत-प्रवेशिका', पृ॰ २१४.



என்னவென்றால் இதில் கதையின் முற்பாதி முற்றிலும் கற்பனையின் அடிப்படையிலும் பிற்பாதி சற்று வரலாற்றின் அடிப்படையிலும் நிறுவப்பட்டிருக்கிறது, ஆகவே இதில் கற்பனையோடு வரலாறும் சேர்ந்து கவிநடனம் புரிவதைக் காணலாம். இவ்வாறு இப்பெருங்காப்பியமாகிய "பத்மாவத்" சூபி மதத்தின் தத்துவங்களைச் சிறந்ததொரு இலக்கிய முறையில் வரலாற்றோடு இசைந்து விளக்கிக் காட்டுகின்றது. இதனோடு இக்காப்பியத்தில் வரும் எண் சுவைகளைத் ததும்பச் செய்யும் எழுத்தோவியங்களும் எழில் நிறைந்த அணிகளும் போற்றத் தக்கவையாக அமைந்திருக்கின்றன. இக்காப்பியத்தால் சூபி கவி ஜாயஸியின் பெயர் இந்தி இலக்கியத்தில் என்றும் நன்கு நிலவும் என்பது திண்ணம்.

ز آستان خود او همچوسگ مرا راند
کجا رقیب ز سوز تو اے رضی داند
کسے که سوخته است او زهجری داند
فراق نامه خواجو کسی که بر خواند
بآب دیده بشوید سیاهی از طومار

ایك جگه سرقه شعری پر بحث کی ھے . اور لکھا ھے که ایك دن یاران محفل کے درمیان سرقه شعری کے موضوع پر بحث ھورھی تھی ایك فریق کا خیال تھا که شعر میں توارد نہیں ھوسکتا . کم از کم الفاظ کے استعمال میں کچھ نه کچھ فرق ضرور نکل آئیگا . دوسروں نے کہا توارد ھونا بالکل ممکن ھے . قاضی رضی الدین مرتضی پہلے فریق کے حامی تھے . مگر چند دن کے بعد انھوں نے سعدی کی ایك غزل کی زمین میں ایك غزل لکھی . اور کچھ دنوں کے بعد سعدی کا دیوان دیکھا تو اس میں ایك پورا شعر بجنسه سعدی کا کہا ھوا نکل آیا . وہ شعر یه تھا .

شب فراق که داند که تا سحر چند است
مگر کسی که بزندان عشق در بند است

اس ذاتی تجربه کے بعد وہ بھی قایل ھوگئے که بسا اوقات معنی کا توارد الفاظ کے توارد کا بھی موجب بن جاتا ھے .

قاضی رضی الدین مرتضی کے متعلق جیسا که ھم نے اوپر لکھا ھے . تاریخ ولادت و وفات کا کچھ پته نہیں چلتا . البته خاندانی بیاضوں سے جو شجره فراھم کیا گیا ھے اس سے معلوم ھوتا ھے که قاضی رضی‌الدین کي اولاد بھي تھی . ان میں سے پانچ لڑکوں کے نام ھمیں معلوم ھین . یعنی



